## Key words

*Land endowment, economic upliftment, copper plates of Bengal, instructions of the Dharmaśāstras*


## Introductions

Economics (Arthanīti) means principles of wealth which are the means of profession through agriculture, industry, commerce etc . The resource created by the people engaged in earning money through their profession is also called 'Artha' . Thus the resource produced is the 'Artha' to the producers but on the other hand, this is the economy of the society in which those producers relate themselves. In Kauṭilya's Arthaśāstra (321-296 B.C) the term 'Artha' has double meaning i.e it is used in two ways —

मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः। तस्याः पृथिव्याः लाभपालनोपायः शास्त्रमर्थशास्त्रमिति ॥[1]

Here the term 'Vṛtti' refers to both the means of livelihood and men's existence on earth. In fact, the earth, inhabited by people following various occupations constitutes 'Artha '. The real utilization of the earth is the way of generating resource both to the king and to the subjects . According to Kāmandaka (before 4$^{th}$ century A.D ), the prosperity and welfare of a king depend on the development of resource of a state and so the quality of the land (fertility and soil resources) is at the root of prosperity and well- being of a kingdom —

भूगुणैर्बर्द्धते राष्ट्रं तद्बृद्धिर्नृपबृद्धये ।
तस्माद् गुणवतीं भूमिं भूत्यै भूपस्तु कारयेत् ॥[2]

## Types of the donated land found in the records

We may find the different types of land as referred to in the Bengal inscriptions such as 'Cultivated land' (क्षेत्र, वापक्षेत्र), 'Wasteland', (खिल क्षेत्र , अप्रहत), 'Habitable land' (वास्तु भूखण्ड), 'Pasture'(तृणभूमि ) and Garden and 'Forest land' (अटबी भूखण्ड ). Almost in all the copper plates we may find some characteristic features of the donated lands . The term 'क्षेत्र' is very often referred to in the inscriptions which means cultivated or arable lands.

अष्टक–नवक–नलाभ्यामपविञ्छय क्षेत्रकुल्यवापमेकं दत्तम्।[3]

In this connection we may refer to 'वापक्षेत्र' —

तथा वापक्षेत्र–मण्डलाः कृत–कलना दृष्टि–मात्र–प्रवन्धेन ताम्रपट्ट–धम्मणा विक्रयमानकाः॥[4]

Here the term 'वाप' however means the field where seeds are sown . According to Dr. Sircar 'वापक्षेत्र means a cultivable land. In this connection we may refer to the Bṛhaspatisaṃhitā (200-400 A.D) where it is stated that the person who donates the furrowed lands will go to the celestials region and enjoy heavenly pleasure gloriously so long as the solar rays remain in the three regions —

फालाकृष्टां महीं दत्वा सवीजां शस्यशालिनीम् ।
यावत् सूर्य्यकरा लोकास्तावत् स्वर्गे महीयते ॥[5]

We may find the term ' खिल' in the inscriptions which means waste land or fallow land . It is very often referred to as the endowment to the Brāhmaṇas or other religious community. The copper plates from 'Damodarpur'[6], 'Bāigrām' [7] 'Pāhārpur' [8] etc incised during the Gupta era refer to the term 'Khilakṣetra'. The Nāradasmṛti (before 8th century A.D), however, refers to the terms 'खिल' (the plot laid waste for three years) and 'अर्द्धखिल' (the plot laid waste or untilled for one year) —

सम्बत्सरेणार्धखिलं खिलं तद्वत्सरैस्त्रिभिः ।
पञ्चवर्षावसन्नं तु स्यात् क्षेत्रमटवीसमम् ॥[9]

From the Pāhārpur copper plate inscription of the Gupta year 159 (479A.D) we come to know that the state's waste land requiring reclamation was sold at a cheaper rate. In this reference ,the term 'बास्तु ' means the habitable land —

समुदयवाह्याप्रतिकर–खिलक्षेत्रवास्तु–विक्रयो ।[10]

The copper plate grants record the donation of such 'Vāstu' or homestead land or habitable land to the Brāhmaṇas to worship and to maintain 'Vali' , 'Caru' , 'Satra' etc—

प्रसादाश्रिरो वसन्नखिलभुखण्डलकं वलिचरुसत्त्रप्रवर्त्तनाय व्राह्मणोपयोगाय ।[11]

Kauṭilya (321-296 B.C) has advised the king to establish 'Brahmāraṇya' and 'Somāraṇya' etc for the Brāhmaṇas and the sages for dwelling and learning Vedas and Upaniṣads and to perform the Soma sacrifices etc. — अकृष्यां भूमौ पशुभ्यो विवीतानि प्रयच्छेत् ।
प्रदिष्टाभयस्थावरजङ्गमानि च व्राह्मणेभ्यो व्रह्मसोमारण्यानि,तपोवनानि च तपस्विभ्यो गोरुतपराणि प्रयच्छेत् । [12]

We have the reference of 'तृणपूतिगोचर ' in the inscriptions which means the pasture land full of grass used for grazing cattle —

तृणपूतिगोचरपर्य्यन्ता सतला सोद्देशा साम्रपनसा सगुवाकनालिकेरा सलवणा सजलस्थला सगर्तोषरा सदशापराधा ।[13]

In fact, the donated land was consisted of 'तृणपूतिगोचर' Here ' गोचर ' means the pasture land where the cattle used to graze. It is referred to as Bibīta in the Arthaśāstra ((3 21-296 B.C) —

अकृष्यां भूमौ पशुभ्यो विवीतानि प्रयच्छेत्[14]

According to Nāradasaṃhitā (before 8th century A.D) there should be a pasture land for grazing the cattle and so the cultivated land should be separated by a fence so that the cattle may not damage the crops.[15] Besides all these terms we find the term 'Araṇya' in the Copper Plates .[16]

Here it is obvious that different types of land were donated for various purposes. From the characteristic features of the land donated as referred to in the copper plates we may conclude that mostly marshy, forest and fallow lands were endowed to the donees . Thus the land left deserted were indirectly reclaimed as a result of which agricultural projects were encouraged and the donees as well as the villagers had an economic upliftment.

## Boundary of the donated land

Lands were donated to the Brāhmaṇas or to any temple, monastery etc and the piece of land donated was demarcated (circumscribed) by boundary which is referred to in the copper plates of Bengal . In fact ,the boundary was marked for the safety of the land so that the donee might enjoy it. The Dharmaśāstras also instruct that any kind of land of a particular person should be demarcated. According to Manu(200 B.C -200 A.D) that land should be marked by trees, shrubs, different types of bamboos, creepers, raised mounds, reeds and thickets of kubjaka as boundry–

सीमाबृक्षांश्च कुर्बीत न्यग्रोधाश्वथ्थकिंशुकान् ।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैब पादपान् ॥
गुल्मान् बेणूंश्च बिबिधान् शमीबल्लीस्थलानि च ।
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति ॥[17]

In the Dharmaśāstras of later period such as in the Bṛhaspatisaṃhitā (2nd-4th centuary A.D) we also have the same instruction for the demarcation of the boundary of the donated land—[18]
That the boundary of a donated land was demarcated by the trees is referred to in the Khālimpur Copper Plate Inscription of Dharmapāla (8th century A.D.) and also in the Nidhanpur Copper Plate Inscriptions of Bhāskaravarman (7th century A.D.). [19] In the Khālimpur Copper Plate Inscription of Dharmapāla we have the reference of a date –palm which demarcates the northern boundary of the village Kranucaśvabhra .[20] We may find the references of specific determination of boundaries in the inscriptions as well as in the Dharmaśāstras which was strictly followed and recorded . Manusaṃhitā states in this regard—

सीमायामविषह्यायां स्वयं राजैब धर्मवित् ।
प्रदिशेद् भूमिमेतेषामुपकारादिति स्थितिः ॥[21]

## Land measurement

From the copper plate grants we come to know that all the lands donated, bought or sold were measured by someone with the help of 8×9 reeds—

शिवचन्द्र–हस्तेनाष्ट–क–नवक–नलेन ।[22]

The term 'Hasta' (हस्त) is used in the case of measurement of the land in the copper plates. In the Arthaśāstra (321-296 B.C) we have found the reference of 'Hasta' meaning the stick used for measurement —

द्विचत्वारिंशदङ्गुलस्तक्ष्नः क्राकचिककिष्कुः स्कन्धावारदुर्गराजपरिग्रहमानम् । चतुःष्पञ्चाशदङ्गुलः कुप्यवनहस्तः ।[23]

In the Faridpur Copper-plate Inscription of the time of Dharmāditya Regnal year -3 (Middle of sixth centuary A.D) we have the reference[24]. Here the land was measured by the hand of Śiva Candra. In addition to this we have the reference of 'Kulyavāpa'[25], 'Droṇavāpa'[26], 'Āḍavāpa'[27] etc. which were used for the measurement of lands.

## Value of the land

The price of the land was changed according to the situation of the land purchased or sold. In fact, the person who wishes to donate a land to a Brāhmaṇa or any temple, math, monastery etc sometimes had to purchase the land and then to donate it. The medium of the exchange was Dīnār (gold coin used in the Gupta period) We have however the reference of dīnār in the Śrīmulā commentary of Arthaśāstra —रूपदर्शकाः निष्कदीनारादिरूप परिशोधकाः ।[28]We may find the use of silver coins during the Gupta period.[29] These silver coins are called 'Kārṣāpaṇa' in the later period. The Nāradasmṛti refers to the term 'Kārṣāpaṇa' which was, in fact, the silver coins

कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रबर्तते ।
पर्णैर्निबद्धः पूर्बस्यां बिंशतिस्तु पणाः स तु ॥[30]

In the inscriptions of later period i.e in the inscriptions of the Pāla kings the term 'Dīnār' is not in use. In lieu of it we have the reference of Kārṣāpaṇa. In the Gayā copper plate of Govinda Pāla (1161-65 A.D.) —

प्रतिशोडशैब कार्षापणा बृद्धित एब लब्धाः ॥[31]

In this connection we may refer to the term 'Dramma' which is mentioned in the Mahābodhi inscription of the time of Dharmapāla—

पुष्करिण्यत्यगाधा च पूता विष्णुपदीसमा ।
त्रितयेन सहस्रेण द्रम्माणां रवानिता सतां ॥[32]

'Paṇa' is another type of currency which is found in the Egrā copper plate inscription of Śaśānka— चतु ष्पणिक द्रोणबापाद्ध–स्माङ्गारादिना द्रोणबाप–शतं ।[33]

From very ancient period this term "Paṇa" was used as an unit of penalty which one had to pay for his misdeed . In the Arthaśāstra we have the mention of 'Paṇa' in case of using incorrect beam of balance—

अप्रतिविद्धस्यात्ययः सपादःसप्तविंशतिपणः । प्रातिवेधनिकं काकणिकमहरहः पौतवाध्यक्षाय दद्युः ॥[34]

In later period the Nāradasmṛiti refers to this term where it is stated that twenty Paṇas make one Kārṣapaṇa—

कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रबर्तते ।
पर्णैर्निबद्धः पूर्बस्यां बिंशतिस्तु पणाः स तु ॥[35]

All the terms like 'Dīnār', 'Dramma', 'Kārṣāpaṇa' , 'Paṇa' etc were used in the Bengal records and as well as in the ancient Dharmaśāstras and Arthaśāstra . In the modern period all these terms are not in vogue . But in the modern age we have the use of currency and coins made of metals or paper which are at present the means of exchange.

## Tax collection from the land

Tax collection is an inevitable duty of a king. He should impose taxes on his subjects to keep the kingdom safe and secured according to the laws and regulations of Smṛtiśāstras. Manu has truly advised that the king should draw the moderate annual taxes from his realm—

यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतब्यो राष्ट्राद्राज्ञाब्दिकः करः ॥[36]

The early lawgiver Gautama [37] , Nārada [38] lay down that the taxes are to be paid in return for the protection given by the king. The Khālimpur Copper Plate of Dharmapāla states that the tillers of land should make over to the donee the customary taxes , means of subsistence and all other kinds of revenue —

प्रतिवासिभिः क्षेत्रकरैश्चाज्ञाश्रवणविधेयैर्भूत्वा समुचित-कर- पिण्डकादि-सर्व्व- प्रत्यायोपनयः कार्य्य इति ॥ [39]

Here the means of subsistence i.e. 'पिण्डक' refers to the payments in kind just like 'भाग', 'भोग' etc .We have the reference of such 'पिण्डक' in the Arthaśāstra where it is stated as 'पिण्डकर' meaning a type of royal tax to be given to the king in kinds[40] .

We have the mention of different taxes such as 'Vali', 'Bhāga', 'Bhoga', 'Kara', 'Hiraṇya', 'Uparikara', 'Piṇḍa' etc in the copper plates of Bengal—

यथाकालं समुचित-भाग-भोग-कर-हिरण्यादिप्रत्यायोपनयः कार्य इति ॥ [41]

The tax collected for the supply of flowers, fruits and fuel wood was called 'Bhoga'. 'Bhāga' tax was imposed on land and was paid in produced crops. The tax, 'Kara', was imposed on property. 'Hiraṇya' is the revenue on some special crops paid in cash. We find the mention of the tax named 'Sāmudāyika' in the Mallasārul Copper-plate Inscription of Vijayasena of the time of Gopacandra –Regnal year-3 (625A.D-675 A.D) [42]

**Various conditions of the Land donation**

There were various types of conditions of land endowment mentioned in the copper plates , such as Apradādharma, Nīvīdharma, Akṣayadharma, Apradākṣanīvī. The word 'Nīvī' as referred to in the copper plates is mentioned in the Smṛitiśāstras. According to Kauṭilya the donee should not sell or mortgage or transfer the donated piece of land to any other else[43] . Manu has also stated that the king's duty is to entrust the 'Akṣayanīvī' to the Brāhmaṇas . That means nobody will be able to occupy or steal the land, money etc given by the king to the Brāhmaṇas. —

न तं स्तेना न चामित्रा हरन्ति न च नश्यति ।

तस्माद्राज्ञा निधातब्यो ब्राह्मणेष्बक्षयो निधिः ॥ [44]

As the 'Akṣayanīvī' is entrusted by the kings , the Brāhmaṇas would get financial stability with the help of the land or money donated .Without the approval of the king no land could be donated .The copper plates of the Gupta period record that the rule of 'Nīvīdharma' or 'Akṣayanīvīdharma' was in vogue in Bengal. [45]Through the copper plates the donee is directed not to sell or donate or transfer the donated land . Most of the Copper Plates refer to the term Nīvīdharma which indicates that through this 'Nīvīdharma' the donee would enjoy the donated land as long as the sun, the moon and the stars exist –

आचन्द्रार्कक्षितिसमकालं यावत् भूमिच्छिद्रन्ययेन ताम्रशासनोकृत्य प्रदत्तास्माभिः ।[46]

The another condition of land endowment was 'Bhūmicchidranyāya' which denotes such land not used for farming or homestead. —

भूमिच्छिद्रन्यायेन ताम्रशासनीकृत्य प्रदत्तोऽस्माभिः ।[47]

The term "Bhūmicchidranyāyena' is used in most of the Copper plates as the land was donated according to 'Bhūmicchidranyāya' as directed by Kauṭilya .The term 'Bhūmicchidra' denotes the process through which an uncultivated land may be utilized as the source of income[48]

The copper plates inform us different types of information such as (i) The name of the doner , his/her lineage (ii) The name of the donee and his lineage[49] (iii) The quantity of the land donated, the boundary of that land[50]and its special characteristic features[52] (iv) the location of the donated land[53] (v) the name of the persons in presence of whom the land transaction was made[54].Since the Gupta period till 13$^{th}$ century A.D. we may find that the terms and conditions followed in the field of land endowment were almost the same which are laid down in the Dharmaśāstras and in all types of donations ,the Brāhmaṇas were endowed the lands through copper plates so that the endowment might last long—

ताम्रशासनीकृत्य प्रदत्तोऽस्माभिः । [55]

The Viṣṇusaṃhitā directs the king to donate land through copper plates so that it may last long . In that copper plate the king should refer the names of the three prior generations of the ancestors of that Brāhmaṇa to whom he donates the land and the king also should refer to the prior three generations of his own lineage —
ब्राह्मणेभ्यश्च भुवं प्रतिपादयेत् ॥ तेषां येषाञ्च प्रतिपादयेत् स्ववंश्यान् अन्तरप्रमाणं दानच्छेदोपवर्णनञ्च पटे ताम्रपट्टे वा लिखितम् । [56]

This saṃhitā directs the king to demarcate the donated land so that the donee may not be affected economically ,or so that none can encroach his land in future .It is also hereby directed that the king who donates land should engrave his own seal on that copper plate so that his later generation could understand the original picture of the donation .

स्वमुद्राङ्कितञ्चागामिनृपविज्ञापनार्थं दद्यात् ॥ [57]
स्वहस्तकालसम्पन्नं शासनं कारयेत् स्थिरम् ॥[58]

## Conclusion

Thus we may cite the references from different copper plates to show that the donated lands were accordingly to the directions of the Dharmaśāstras .It is obvious from the above discussion that different types of lands were donated to the Brāhmaṇas as gifts which are of great importance from the economic perspective. Most of the copper plates show that the doners purchased the land from the kings at a fixed rate of cost and donated it to the Brāhmaṇas being permitted by the king to donate it . Most of the donated lands were fallow ,uncultivable and marshy as a result there was no source of income from those lands .But when those lands were purchased for donation by the doners ,a sum of money was deposited in the royal treasury of the king . Moreover, there might be an income from the lands such as 'Khila' , 'Arddhakhila' etc in every two or three years. On the other hand, if the donee was given the cultivable land as donation he might produce much more than earlier with his own effort and might increase his economic stability . Land donation through copper plates was also done to the temples, maṭhs etc. In this connection we may presume that the persons related to the daily ritual performances of those temples & maths enjoyed the income obtained from those lands and earned their livelihood .We may also presume that there might be a gathering of the pilgrims in those temples, maṭhs etc from which the donee might have enjoyed an earning of livelihood . In fact ,the donation was made as per the instruction of the Dharmaśāstras so that the Brāhmaṇas might get economic solvency & stability for ever. We may presume that there might be an economic recycling among the inhabitants of the land endowed as a result of which there might be an economic upliftment . The subjects of the king would become loyal to the king also and there would exist a happy and well –to – do atmosphere throughout the kingdom and for this reason, perhaps, the kings donated the lands.

प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥

## References


1. Kauṭilīyam Arthaśāstram —15.1.1
2. Kāmandakīya Nītīsāra —4/50
3. Dhānāidaha Copper-plate Inscription of Kumāragupta I 113 Gupta Year (432-33 A.D) line no— 10-11
4. Faridpur Copper-plate Inscription of the time of Dharmāditya Regnal year -3 , line no— 11-12,
5. Bṛhaspatisaṃhitā—-6
6. Dāmodarpur Copper-plate Inscription of the time of **Gupta Year- 214 (543 A.D.)line no— 17-18,
7 Bāigrām Copper-plate Inscription of the Gupta year 128 (448A.D)line no—8,
8. Pāhārpur Copper-plate Inscription of the Gupta year 159 (479A.D.)Line no-12,
9. Nāradasmṛti —11/26
10. Pāhārpur Copper-plate Inscription of the Gupta year 159 (479A.D.) line no— 11-12 ,
11. Ghughrāghāṭī Copper-plate of Samācāradeva line no— 9-11,
12. Kauṭilīyam Arthaśāstram — 2.2.1
13. Rāmapāla Copper-plate of Śrīcandra(11th century A.D.) line no— 24-25 ,
14. Kauṭilīyam Arthaśāstram — 2.2.1
15. Nāradasmṛti —11/40-41

16. Dāmodarpur Copper-plate Inscription of the time of **Gupta ,Gupta year 214G.E (543 A.D.) line no—8-10,
17. Manusaṃhitā — 8/246-247
18. Bṛhaspatisaṃhitā—-19/2-3
19. Nīdhanpur Copper-plates of Bhāskaravarman line no— 128- 130 ,
20. Khālimpur Copper-plate Inscription of Dharmapāla line no —32 ,
21. Manusṃhitā — 8/265
22. Faridpur Copper-plate Inscription of the time of Dharmāditya Regnal year -3 , line no.15-16
23. Kauṭilīyam Arthaśāstram — 2.20.3
24. Faridpur Copper-plate Inscription of the time of Dharmāditya Regnal year -3 ,line no —15-16
25. Dāmodar copper plate inscription of Kumāragupta 1 ,124 G.E (444 A.D) line no —7-9
26. Egrā copper plate of the time of Śaśānka line no —26,
27. Naihāṭī copper plate of Vallālasena line no —44-46
28. Śrīmulā commentary of Arthaśāstra -2.9.6
29. Bāigrāma Copper-plate Inscription of the Gupta 128 (448 A.D)line no—14-17,
30 .Nāradasmṛti — 18/57 (caūrapratiṣedha)
31. Gayā inscription mentioning Govindapāla Vikrama-1232, line no—6,verse no-2
32. Mahābodhi inscription of the time of Dharmapāla (Keśava Praśasti) verse no-3, line no —4-6 .
33. Egrā copper plate of the time of Śaśāṅka line no —26,
34. Kauṭilīyam Arthaśāstram — 2.19.8.
35. Nāradasmṛti — 18/57 (Caūrapratiṣedha)
36. Manusṃhitā —7/129
37. Gautamsaṃhitā – 10/28
38. Nāradasmṛti — 17/48
39 .Khālimpur Copper-plate Inscription of Dharmapāla line no —55,
40. Kauṭilīyam Arthaśastram--2.15.1
41. Nālandā copper-plate Inscription of Devapāla(812-50 A.D) Regnal year- 35 ,line no —42,
42 .Mallasārul Copper-plate Inscription of Vijayasena of the time of Gopacandra –Regnal year-3 line no —4-5 ,
43. Kauṭilīyam Arthaśāstram — 2.1.2
44. Manusṃhitā —7/83
45. Dāmodarpur Copper-plate Insacriiption of the time Kumāragupta I, Gupta Year 129 (448A.D.) line no-6-7,
46. Barackpur Copper-plate of Vijaysena line no - 43,
47. Naihāṭī Copper-plate of Vallālasena(12th century A.D) line no —54,
48. Bhūmicchidrabidhanam ,Kauṭilīyam Arthaśāstram — 2.2
49. Belāva copper plate Inscription of Bhojavarman line no—41-45
50. 'सपादनवद्रोणाधिकपाटकभूमौ | 'Belāva Copper-plate of Bhojavarman(12th Century A.D) line no —28-29,
52. Belāva Copper-plate of Bhojavarman(12th Century A.D) line no —37-41,
53. Belāva Copper-plate of Bhojavarman(12th Century A.D) line no —27-28,
54. Dāmodarpur copper plate of Kumāra Gupta I (448.A.D) line no —3-7,
55. Naihātī copper plate of Vallālasena(12th Century A.D)line no —54,
56. Viṣṇusaṃhitā. 3/57-58.
57 . Viṣṇusaṃhitā. 3/58.
58.. Yājñavalkyasaṃhitā —1/318-320

---

## Bibliography


1.Bandyopadhyaya Manbendu , Kāmandakīyanītisāraḥ , Kolkata 1919
2. Bandyopadhyaya Manbendu , Kauṭilyam Arthaśāstram ( 1st,2nd Khaṇḍa ) Kolkata , Mahalaya 2002
3 Bandyopadhyaya Manbendu , Manusaṃhitā , Kolkata 1410 (Bengali Year)
4 Chattopadhyaya Ashok Shastri , Pāla Abhilekhsaṃgraha , Kolakata August 1992
5. Das Sukla , Socio-Economic Life of Northern India(AD-550 to AD.650) , Delhi 1980
6.Maitreya Akshaya Kumar ,Gauḍa-lekha–mālā (containing inscriptions of Pāla Kings), Kolkata Jun 2004
7. Maitreya Akshaya Kumar , Gauḍarājamālā , Kolkata 2006
8. Majumdar N.G. , Inscriptions of Bengal Vol.III containing inscriptions of the Candras ,the Varmans and the Senas and of Iśvaraghoṣa and of Dāmodara , Kolkata 2003

9. Sircar Dīneshchandra Śilālekhe Tāmraśāsanādir Prasaṇga, Kolkata , March 2009
10 Sircar Dīneshchandra, Select Inscriptions bearing on Indian History and Civilization (Vol-1,2) Calcutta University1965

11. Smṛtitīrtha Narayan Chandra, Nāradasmṛti , Calcutta ,1966
12. Tarkaratna Pañcānana , Ūnabiṃśatisaṃhitā , Kolkata, 1310 (Bengali Year )



**Arpita Dey ,Assistant Professor ,Department of Sanskrit ,Bethune College ,Kolkata-6**

arpitabiswasdey@gmail.com. **7384647153**

# रथेशशतकस्य समीक्षात्मकमध्ययनम्

## (RATHESHASHATAKASYA SAMIKSHATMAKAMADHYAYANAM)

by
ड. सुनेली देई
**(Dr. SUNELI DEI)**
Assistant Professor
School of Sanskrit
Gangadhar Meher University
Amruta Vihar
Sambalpur-768004
**ID-** drsunelidei@gmail.com
- 9583052516

## रथेशशतकस्य समीक्षात्मकमध्ययनम्

ड.सुनेली देई, सहायिका आचार्या,
संस्कृतविभागः
गङ्गाधरमेहेरविश्वविद्यालयः, सम्बलपुरम्

### १.१ शोधपत्रसारः

उत्कलीयकवेः कृष्णकेशवषडङ्गिनः रथेशशतककाव्यं श्रीजगन्नाथमहाप्रभोः रथयात्रोत्सवस्य पूर्णविवरणीं प्रददाति । रथेशशतककाव्ये १०३ श्लोकाः सन्ति । अस्य काव्यस्य मुख्यरसः भक्तिरसः भवति । काव्यस्य प्रारम्भे नीलाद्रिनाथस्य रथेशस्य श्रीजगन्नाथस्य कृते प्रशस्तिवाचकः एकः विरुदः नीलाद्रिनाथविरुदनाम्ना वर्त्तते । काव्यस्य आरम्भतः अन्तं यावत् नीलाद्रिनाथस्य रथेशस्य श्रीजगन्नाथस्य जयगानं क्रियते । काव्येऽस्मिन् रथयात्रादिवसीयदृश्यानां रथप्रतिष्ठा-पदहिण्डन-वेषकरण-रथमार्जन-अश्वयोजन-रथाकर्षणादीनां प्रमुखभावेन वर्णितमस्ति । अधिकन्तु महाप्रभोः रथेशस्य रूपमाधुरी-लीलामाधुरी-गुणमाधुरी-धाममाधुरी-नाममाधुरी-प्रसादमाधुरीप्रभृतिविषयाणां व्यञ्जना स्थाने स्थाने श्लोकेषु प्रदर्शिता अस्ति ।

***१.२ कुञ्चिकाशब्दाः*** *- "रथेश जय हे", श्रीयुतकृष्णकेशवकवेरेषा कृतिः ।*

**१.३ वर्णनीयविषयवस्तु** - अस्य शोधपत्रस्य मुख्यवर्णनीयविषयवस्तु भवति रथेशशतककाव्यस्य रचयितुः ड. कृष्णकेशवषडङ्गिनः परिचयप्रदानपुरःसरं रथेशशतककाव्यस्य कथावस्तुवैशिष्ट्यादीनां प्रतिपादनम् ।

**१.४ उपक्रमः**

रथेशशतकम् क्रमेण एकं लघुकाव्यं शतककाव्यं गीतिकाव्यञ्च भवति । रथेशशतककाव्यस्य रचयिता भवति उत्कलीयकविः ड. कृष्णकेशवषडङ्गी । काव्यस्य अन्ते पुष्पिकायां २०२० ख्रीष्टाब्दे फाल्गुनमासे कृष्णपक्षे श्रीशिवरात्रिसंयुतायां चतुर्दश्यां तिथौ नीलाद्रीश्वरगुण्डिचामहमहोदीप्तं रथेशशतककाव्यं कविना ड. कृष्णकेशवषडङ्गिना पूर्णतां गतमिति सूचितमस्ति । तथा हि—

**ख्रीष्टाब्देऽम्बरदृङ्नभोऽक्षिगणिते मासे तपस्येऽसिते**

**पक्षे श्रीशिवरात्रिसंयुतचतुर्दश्यां तिथौ प्रत्युषे ।**

**नीलाद्रीश्वरगुण्डिचामहमहोदीप्तं गतं पूर्णतां**

**सद्यः पद्यमयं रथेशशतकं ध्येयं भवेद्धीमताम् ।।**[१]

**१.५ कवेः जन्मस्थानं समयश्च**

रथेशशतककाव्यस्य रचयिता उत्कलीयकविः ड. कृष्णकेशवषडङ्गी १९७८ ख्रीष्टाब्दे जुन् मासस्य अष्टादशदिनाङ्के कटकमण्डलस्य वैदेश्वरग्रामे जन्मग्रहणमकरोत् । तस्य पितुः नाम प्रवक्तारत्नः स्वर्गतः पण्डितः जयदेवः षडङ्गी मातुः नाम च श्रीमती मनोजमञ्जरी षडङ्गी । कविः कृष्णकेशवः षडङ्गी सम्प्रति कटकमण्डलस्य वाङ्कीनामके स्थाने सर्वकाराधीनस्थ-व्लक्-पशुरोगचिकित्सा-अधीकारीभावेन कार्यं करोति । कविः ड. कृष्णकेशवषडङ्गी स्वर्गतः रघुनाथषडङ्गी- स्वर्गतः जयदेवषडङ्गी- स्वर्गतः

---

१ रथेशशतकम्, पुष्पिका-१

प्रफेसर् दोलगोविन्दशास्त्री- प्रफेसर् गोपीनाथमहापात्रः- पण्डितप्रबोधकुमार-मिश्रमहाभागेभ्यः संस्कृतविषये शिक्षालाभं कृतवान् ।[२]

## १.६ कवेः कृतयः

कविः ड. कृष्णकेशवषडङ्गी चतुर्द्दशग्रन्थान् रचितवान् । १) श्रीशिवताण्डवस्तोत्रस्य संस्कृत-ओडिआभाषयोः अनुवादः (ख्री. १९९६), २) पण्डित नीलमणिविद्यारत्ननक्षत्रमाला (ख्री. १९९८)- एकः काव्यग्रन्थः, ३) पुण्यश्लोकप्रशस्तिका (ख्री. १९९९) एकः काव्यग्रन्थः, ४) श्रीजगन्नाथस्तुतिमन्दाकिनी (ख्री. २०००) श्रीजगन्नाथाष्टकस्य ओडिआ-अनुवादग्रन्थः, ५) तपस्विनी (ख्री. २००१) संस्कृतपद्यानुवादग्रन्थः, ६) जीमूतदूतम् (ख्री. २००२) एकं खण्डकाव्यम् , ७) नीलाद्रिचम्पूः (ख्री. २००३) एकं चम्पूकाव्यम् , ८) गङ्गाधरार्धः (ख्री. २०१०) अर्घ्यथालि इति ओडिआकाव्यग्रन्थस्य संस्कृतानुवादः , ९) मेघदूतम् (ख्री. २०१३) ओडिआ-अनुवादग्रन्थः, १०) नीलाद्रीश-चतुस्त्रिंशिका (ख्री. २०१७) नीलाद्रीश चउतिशा इति ओडिआकाव्यस्य संस्कृतपद्यानुवादः ११) अंशुपाविलास (ख्री. २०१८) ओडिआ-काव्यग्रन्थः, १२) रथेशशतकम् (ख्री. २०२०) एकं शतककाव्यम् , १३) समुद्रशतकम् (ख्री. २०२०) एकं शतककाव्यम्, १४) हनुमच्चत्वारिंशिका (ख्री. २०२१) हनुमान् चालिशायाः संस्कृतपद्यानुवादः ।

## १.७ रथेशशतकस्य विषयवस्तु

रथेशशतककाव्ये पुष्पिकाश्लोकद्वयेन सह त्रयधिकैकशतं (१०३) श्लोकाः सन्ति । ग्रन्थस्य प्रारम्भिकश्लोकतः आरभ्य अन्तिमश्लोकं यावत् प्रत्येकश्लोके रथेशस्य श्रीजगन्नाथस्य विजयः भवतु इति कविनोक्तम् । प्रथमश्लोके श्रीजगन्नाथः त्रिभुवनेश्वरः लीलामयः नीलाद्रिनिवासी सृष्टिस्थितिप्रलयकारकश्च भवतीति उच्यते । द्वितीयश्लोके श्रीजगन्नाथस्य पहण्डियात्राविषये, तृतीयश्लोके श्रीजगन्नाथस्य पहण्डियात्रार्थं तूलोपरि पदस्थापननीतिविषये, चतुर्थश्लोके श्रीजगन्नाथस्य रथे आरोहणार्थं रत्नसिंहासनतः द्वाविंशतिसोपानमार्गेण रथस्य समीपमागमनविषये, पञ्चमश्लोके श्रीजगन्नाथस्य कुसुमवंशकनिर्मितटाहिआधारणविषये च वर्णितमस्ति । षष्ठश्लोके श्रीजगन्नाथः

२ कवेः जीवनवृत्तान्तविषये यदुल्लिखितमस्ति, तत्सर्वं कविनैव उक्तम् ।

प्रणतभक्तजनानामाश्रयदातारूपेण चित्रितोऽस्ति । सप्तमश्लोके चक्रराजसुदर्शन-बलभद्र-सुभद्राणां क्रमेण पहण्डेरनन्तरं हि अन्ते श्रीजगन्नाथस्य पहण्डियात्रा भवतीति विषये सूच्यते । अष्टमश्लोके रथयात्रार्थं नन्दिघोषरथे आरोहणार्थमागतस्य पीतवसनधारिणः श्रीजगन्नाथस्य मुखशोभा वर्णिता अस्ति । अस्मिन्नवसरे तूरी-मधुरी-मृदङ्ग-भेरी-घण्टादीनां मधुरध्वनिः चतुःपार्श्वं आनन्दमुखरितं करोतीति विषये नवमश्लोके वर्णितमस्ति । दशमश्लोके नन्दीघोषरथे विराजमानः श्रीजगन्नाथः भक्तजनेभ्यः स्वस्य अमृतमयदृष्टिनिक्षेपविषये वर्णितमस्ति । एकादशश्लोके प्रभुः श्रीजगन्नाथः युगे युगे उत्कलस्य गङ्गवंशी-सूर्यवंशीप्रभृतिभिः प्रभावशालिभिः राजभिः पूजितः सेवितश्चासीदिति विषये वर्णितमस्ति । द्वादशश्लोके श्रीजगन्नाथस्य दैहिकसुखलाभाय धारितानां शिरोवसन-पृष्ठोपधान-आस्थानोपधानादिषु विषयेषु वर्णितमस्ति । त्रयोदश-चतुर्द्दशश्लोकयोः रथारूढस्य श्रीजगन्नाथस्य समक्षं भक्तजनानां यतिव्रतधारिणां

सन्न्यासिनाञ्च हरिनामसंकीर्त्तनकरणविषये तथा ओडिशीनृत्यगीतादिपरिवेषणविषये वर्णितमस्ति । पञ्चदशश्लोके नन्दीघोषरथस्य षोडशचक्रविषये चारमालादिविषये च वर्णितमस्ति । षोडशश्लोके बलभद्रस्य तालध्वजरथविषये सुभद्रायाः पद्मध्वजरथविषये च वर्णितमस्ति । सप्तदशश्लोकतः द्विचत्वारिंशत् श्लोकं यावत् श्रीजगन्नाथस्य महिमा कीर्त्तितमस्ति । त्रिचत्वारिंशत्तमश्लोके श्रीजगन्नाथस्य मीनावतारधारण-शङ्खासुरवध-वेदोद्धारादिविषये, चतुश्चत्वारिंशत्तमश्लोके श्रीजगन्नाथस्य कच्छपावतारधारण-समुद्रमन्थन- समुद्रमन्थनान्निर्गतचतुर्द्दशरत्नानां विषये, पञ्चचत्वारिंशत्तमश्लोके षट् चत्वारिंशत्तमश्लोके च श्रीजगन्नाथस्य नृसिंहरूपधारणविषये, सप्तचत्वारिंशत्तमश्लोके श्रीजगन्नाथस्य वामनावतारविषये, अष्टचत्वारिंशत्तमश्लोके श्रीजगन्नाथस्य भृगुपतिरूपधारणविषये, नवचत्वारिंशत्तमश्लोके पञ्चाशत्तमश्लोके च श्रीजगन्नाथस्य रघुपतिरूपधारणविषये, एकपञ्चाशत्तमश्लोके श्रीजगन्नाथस्य हलधररूपधारणविषये च वर्णितमस्ति । द्विपञ्चाशत्तमश्लोके त्रिपञ्चाशत्तमश्लोके च श्रीजगन्नाथस्य कृष्णचरितं वर्णितमस्ति । चतुःपञ्चाशत्तमश्लोके पञ्चपञ्चाशत्तमश्लोके च श्रीजगन्नाथस्य पहण्डियात्राकालस्य मनोरमदृश्यं वर्णितमस्ति ।

षट्-पञ्चाशत्तमश्लोकतः आरभ्य त्रयधिकैकशत्तमश्लोकं यावत् अष्टचत्वारिंशत् श्लोकेषु गजपतिदिव्यसिंहदेवेन कृताः रथसमार्जनेन सह रथे विराजितानां बलभद्र-सुभद्रा-जगन्नाथानां वन्दन-व्यजन-चामर-आरत्रिकादयः, रथसमक्षे गौडीयवैष्णवैः हरिनामसंकीर्त्तनपूर्वकं नृत्यप्रदर्शनम्, स्कन्दपुराणोक्तं पुरुषोत्तममाहात्म्यवर्णनम् , भक्तजनैः तालध्वज-पद्मध्वज(देवदलन)-गरुडध्वज (नन्दीघोष) रथानां रज्ज्वाकर्षणं कृत्वा रथचालना, रथचलनसमये डाहुकस्य गीतगानेन सह यष्टिचालना, प्रसङ्गक्रमेण बलरामदास-सालवेगप्रभृतीनां श्रीजगन्नाथस्य श्रेष्ठभक्तानां भक्तिभावस्य प्रख्यापनम् , अमृतमधुरदृष्टिपातैः भक्तजनानां सकलमनोकामनां परिपूरणपूर्वकं श्रीजगन्नाथस्य सुभद्राबलभद्राभ्यां सह गुण्डिचामन्दिरे प्रवेशश्चेत्यादयः नवदिनात्मके रथयात्रादिवसे अनुष्ठिताः सर्वाः क्रियाः वर्णिताः सन्ति ।

## १.८ रथेशशतकस्य वैशिष्ट्यम्

रथेशशतककाव्यस्य सकले श्लोकाः पृथ्वीछन्दसा रचिताः । काव्येऽस्मिन् श्लोकैः सह तेषामन्वयाः उत्कलार्थाः आंग्लोभाषा-हिन्दीभाषाभ्यामनूदितार्थाः च प्रदत्ताः । रथारूढः भगवान् जगन्नाथः अस्य काव्यस्य आकर्षणस्य मुख्यकेन्द्रस्थलत्वादस्य काव्यस्य प्रतिश्लोकारम्भे “रथेश जय हे” इति संबोध्य कविना काव्यमिदं गुम्फितम् । उदाहरणरूपेण श्लोकद्वयं प्रदीयते, पश्यन्तु, अस्य श्लोकद्वयस्य प्रारम्भे “रथेश जय हे” इति पदानि वर्त्तन्ते ।

**रथेश जय हे प्रभो विपुलचक्रनेत्रद्वय-**
**प्रतापपरिकल्पितव्यसनभीतिदुःखव्यय ।**
**पुराणनिगमागमेषु पुरुषोत्तमेन्द्राह्वय**
**प्रशान्तमतिदायक प्रणतभक्तवृन्दाश्रय ।।**
**रथेश जय हे कवीन्द्रवलरामदासप्रिय**
**स्वभक्तकृतवालुकारथनिवाससिद्धक्रिय ।**
**विनिर्मलमतिस्फुटाभिनवभक्तिभावामृत-**

**प्रपानमुदितान्तर स्वकृतखेलया निर्वृत ।।**[३]

एवंरूपेण प्रतिश्लोकारम्भे "रथेश जय हे" इति पदं वर्त्तते । उपधामिलनमस्य काव्यस्य अपरं वैशिष्ट्यमस्ति । उपर्युक्ते श्लोकद्वये पादान्तेषु उपधामिलनं (अय-अय, इय-इय, ऋत-ऋत) भवति । अपि च काव्येऽस्मिन् प्रतिश्लोकस्य प्रथमतृतीयपादयोः पादान्तदीर्घत्वस्य व्यवस्थितकरणार्थं द्वितीय-चतुर्थपादयोः प्रथमवर्णः संयोगवर्णोऽस्ति । अस्य काव्यस्य अपरं विशेषत्वं भवति यदत्र स्लोकेषु प्रयुक्तानि सर्वाणि पदानि सम्बोधनवाचकानि भवन्ति । काव्येऽस्मिन् रथयात्रासम्बन्धानि फटोचित्राणि अपि प्रदीयन्ते ।

काव्येऽस्मिन् श्रीविष्णोः अवताराणां विविधपौराणिकाख्यानानाञ्च वर्णना कथाप्रसङ्गे क्रियते । नरसिंहरूपधारणं कृत्वा श्रीविष्णुः हिरण्यकशिपोः वक्षर्विदारणं कृतवान्निति विषये कविः सूचयति श्लोकेऽस्मिन्—

**रथेश जय हे विगर्जितजितेन्द्रवज्रारव**
**प्रकाण्डनरकेसरिन् हृषितभक्तकायाधव ।**
**हिरण्यकशिपूद्धतासुरविदारणोद्घाटक**
**प्रतीक्ष्णनखरोच्चयप्रखरचालनापादक ।।**[४]

समासबहुलता अस्य काव्यस्य अपरमेकं विलक्षणं भवति । तद्यथा-

**रथेश जय हे तुलस्यमलपत्रपुष्पोत्कर-**
**प्रकल्पितमनोहरप्रचुरचूलमालाधर ।**
**पदाब्जनतदासियामधुरनारिकेलाशन-**
**प्रमुग्धहृदयस्थलस्रुतकृपारसोल्लासन ।।**[५]

अर्थात्, तुलसी-अमलपत्र-पुष्पाणाम् उत्करेण (समूहेन) प्रकल्पिताः मनोहराः प्रचुराः चूलमालाः धरति यः, सः तुलस्यमलपत्रपुष्पोत्करप्रकल्पितमनोहरप्रचुरचूलमालाधरः । पदाब्जे नतस्य दासिया इति नामधारिणो भक्तस्य मधुरस्य नारिकेलस्य अशनेन

३ रथेशशतकम्, श्लो.-६, ८८
४ तत्रैव, श्लो.-४६
५ तत्रैव, श्लो.-५९

(भोजनेन) प्रमुग्धं यद् हृदयस्थलं तस्मात् स्रुतानां कृपारसानां उल्लासनं (प्रकटनं) यस्मिन्, सः पदाब्जनतदासियामधुर नारिकेलाशनप्रमुग्ध - हृदयस्थलस्रुतकृपारसोल्लासनः । एतादृश हे रथेश ! भवतां जयः भवतु ।

काव्येऽस्मिन् अनुप्रास-श्लेष-उपमाद्यलङ्काराणां प्रयोगः दृश्यते । दृष्टान्तरूपेण अनुप्रासाल -ङ्कारस्य उदाहरणमधः प्रदीयते -

**रथेश जय हे कलाशय दयाजयाशाश्रय**
**व्यथान्वितजनामयप्रमथन प्रदत्ताभय ।**
**क्षमाक्षयगुणालयाचरितदिव्यकृत्योदय**
**प्रभामय रसोच्चयस्फुटपयःपतेऽजाव्यय ।।**[६]

पुनश्च कविः उपमालङ्कारेण श्रीजगन्नाथस्य नीलकलेवरं तमालरुचिसन्निभमिति वर्णयित्वा कथयति-

**रथेश जय हे सुमाभरणपुष्टिहृष्टाकृते**
**तमालरुचिसन्निभ प्रथितशुद्धसत्संस्कृते ।**
**गृहीतनतरक्षणाभ्युदितसाधनास्वीकृते**
**जगत्युदितधार्मिकाचरणशान्तिमत्सत्कृते ।।**[७]

भगवतो जगन्नाथस्य प्रसिद्धानां भक्तानां कथाऽपि अत्र वर्णिता अस्ति । प्रह्लाद-इन्द्रद्युम्न-विद्यापति-बलरामदास-सालवेगादीनां वर्णना सम्यग्रूपेणात्र क्रियते । उदाहरणं यथा-

**रथेश जय हे पथि ध्वनितसालवेगोदित-**

**प्रसिद्धभजनावलीमधुरभावसम्मोदित ।**
**सुभक्तिपुलकाङ्कुरोच्छ्वसितरोमराजीभृतां**
**सलोतकदृशां समृद्धरणतत्पराचीकृताम् ।।**[८]

---

६ रथेशशतकम्, श्लो.- १००

७ तत्रैव, श्लो.-३१

८ रथेशशतकम्, श्लो.- ८९

अर्थात्, मार्गे ध्वनितायाः सालबेगनामकेन भक्तेन रचितायाः प्रसिद्धायाः भजनवल्ल्याः प्रमोदितः तथा भक्तिपुलकेन रोमहर्षणभृतां भक्तिभावाकुलानां सज्जलनेत्राणां पूजकानां समुद्धरणे तत्परः यः, तादृशस्त्वं हे रथेश ! जय ।

काव्यस्यान्ते रथारूढः श्रीजगन्नाथः परिशेषे गुण्डिचामन्दिरं सम्प्राप्तवान्निति कविः सूचयित्वा कथयति-

**रथेश जय हे सुधामधुरदृष्टिसम्पातन-**
**व्युदस्तजनताक्लमाभिगतगुण्डिचाकेतन ।**
**त्रिलोकविरलोत्सवप्रणयने महापाटव-**
**प्रपूर्ण नरकान्तकृत् परम कृष्ण हे केशव ।।**[१]

एवंरूपेण कविना काव्येऽस्मिन् श्रीजगन्नाथप्रभोः रथयात्रायाः तथ्यसम्बलिता मनोज्ञवर्णना कृता ।

## १.९ उपसंहारः

प्रथितयशसः उत्कलीयकवेः कृष्णकेशवषडङ्गिनः रथेशशतकम् एकम् उच्चकोटीरकाव्यम् । रथेशशतके रथारूढस्य श्रीजगन्नाथस्य महिमा कीर्त्तितोऽस्ति । श्रीजगन्नाथस्य रथयात्राकालीनं सर्वविधं वृत्तान्तं काव्यिकशैल्या वर्णितमस्मत्यत्र । जयदेवकृतगीतगोविन्दस्य प्रभावः कवेः ड. कृष्णकेशवषडङ्गिनः पततीति "रथेश जय हे" इति पदेभ्यः ज्ञायते । काव्ये लालित्यपूर्णपदविन्यासस्य अपूर्वछटा परिदृश्यते । कविः वृत्या एकः पशुचिकित्सकः अस्ति, कवेः वृत्तिः यद्यपि संस्कृतं नास्ति, तथापि कविः संस्कृतकाव्यरचने सिद्धहस्तोऽस्ति । अस्माज्ज्ञायते यत् कवेः कविप्रतिभा भगवत्प्रदत्ता एव । अयं यशस्वी कविः दीर्घायुः भवतु, काव्यजगति प्रतिष्ठितो भवतु इति कामये ।

### सहायकग्रन्थसूची


१. नायकः, केतकी, अलङ्कारशास्त्रस्येतिहासः, साम्बिदीप्रकाशनम्, पुरी, १९९७
२. शास्त्री, शालग्रामः, साहित्यदर्पणः, मोतिलालबनारसीदासः, वाराणसी, १९८६
३. षडङ्गी, कृष्णकेशवः, रथेशशतकम्, भुवनेश्वर-भञ्जभारती, भुवनेश्वरम्,ओडिशा, २०२०


---
१ तत्रैव, श्लो.- १०३

# वैशेषिकनये गुणलक्षणसम्बन्धिमतविमृष्टिः

**सुजन-दासः**
शोधच्छात्रः, संस्कृतसंकायः
कोचबिहार-पञ्चाननवर्मा-विश्वविद्यालयः
कोचबिहारः, पश्चिमबङ्गः
Email id- sujan.sanskrit@gmail.com
Mobile No – 7029259100

**शोधसारः**

चतुर्वर्गपुरुषार्थेषु मोक्षप्राप्तये साधनं खलु पदार्थज्ञानमिति कणादनये आम्नातम्। तथाहि जगतः पदार्थान् सप्तधा विभज्य लक्षणस्वरूपं व्याख्यातम्। तेषु सप्तपदार्थेषु द्वितीयः पदार्थस्तावत् गुणः। गुणशब्दः अत्र पारिभाषिकार्थे प्रयुक्तः। वैशेषिकमते चतुर्विंशतिगुणाः जगति प्रसिद्धाः। एते सर्वे पृथक् धर्मावच्छिन्ना, तथापि गुणशब्देन सर्वेषां ज्ञानं भूयते। तच्च कथं सम्भवति इत्याकाङ्क्षायां सकलगुणे साधारणो धर्मरेकः स्वीकर्तव्यः। तद्धर्मो गुणस्यासाधारणो धर्मो भवति। तथा गुणस्य लक्षणरूपेण तद्धर्मो गृह्यते। तस्मात् रूपादिगुणानां ज्ञानार्थं गुणलक्षणस्य विचारः अङ्गीकर्तव्य एव। गुणत्वजातिसिद्धये टीकाकारैर्बहुविधं मतमुपस्थापितम्। तानि मतानि विश्लेषणात्मिकागवेषणापद्धतिमनुसृत्य मयालोचितानि। कानि च गुणस्य साधारणवैशिष्ट्यानि? तानि वैशिष्ट्यान्यपि सयुक्त्या मयोपस्थापितानि।

**कुटशब्दाः**:- *गुणलक्षणं, गुणत्वजातिसिद्धिः, गुणस्य वैशिष्ट्यम् चेति*।

**लक्ष्यविषयः** – गुणस्य लक्षणसम्बन्धी वैशिष्ट्यसम्बन्धी च विषयः।

**उपविषयः**

- गुणस्य लक्षणविचारः ।
- गुणस्य वैशिष्ट्यम् ।

**आलोचना**:- आरूपादारभ्य शब्दो यावत् सप्तदशगुणानां उद्देशो वैशेषिकसूत्रे प्राप्तः[1]। गुरुत्वादयः सप्तगुणाः कणादसूत्रस्थ-चकारेण समुच्चिता इत्युक्तं प्रशस्तपादेन। उदयनादिना टीकाकारेणापि एतत् समर्थ्यते[2]।

**गुणस्य लक्षणविचारः**

गुणस्य अनेकलक्षणानि सन्त्यपि, गुणत्ववत्त्वलक्षणं सर्वतो लघुतया नैयायिकैः अनुगृहीतम्। तत्रादौ गुणत्वजातेर्सिद्धिः कर्त्तव्या। साधारणतया अनुवृत्तिप्रत्ययस्य हेतुरूपेण सामान्यं सिद्धम्। रूपे रसे च 'अयं गुणः' 'अयं गुणः' इत्याकारे अनुगतप्रतीतिः जाता। अनुगतधर्मः अविद्यमाने सति अनुगतप्रतीतिरियं न जायते। तस्माद् गुणविषयकस्य अनुगतबुद्धेः प्रयोजकधर्मरूपेण गुणत्वजातिः सिद्धा। जात्युपाधिभेदेन अनुगतधर्मो द्विधा, किन्तु बाधकाभावे सति तस्य जातित्वम् अङ्गीकृतम्। केषाञ्चित् मते रूपादिगुणे अनुगतबुद्धिः असम्भूता, गुरुत्वभावनादृष्टानां गुणानाम् अतीन्द्रियत्वाद्, गुणशब्देन पारिभाषिकार्थाभिधेयत्वाच्च। श्रीधराचार्यस्य मते, गुणत्वं प्रत्यक्षसिद्धमेव[3]।

गुणत्वजातिसाधकमनुमाणं विश्वनाथेन प्रदत्तं 'द्रव्यकर्मभिन्ने सामान्यवति या सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, दण्डनिष्ठघटकारणतावत्'। अनुमानेऽस्मिन् पक्षस्तावद् द्रव्यसामान्यभेदकर्मसामान्यभेदोभयविशिष्टसामान्यवन्निष्ठ-कारणता, साध्यः खलु किञ्चिद्धर्मावच्छिन्नता, हेतुश्च कारणतात्वम्। व्याप्तिग्राहकदृष्टान्तरूपेण दण्डनिष्ठघटकारणता गृहीता। द्रव्यगुणकर्मसु सामान्यं समवायसम्बन्धेन विद्यमानतया द्रव्यगुणकर्माणि सामान्यवन्तः। द्रव्यकर्मे व्यतिरिच्य गुण एव अवशिष्टः। द्रव्यकर्मभिन्नस्सामान्यवान् यः पदार्थः, तत्पदार्थवृत्तिः या कारणता, सा पक्षः। कारणता सर्वदा किञ्चिद्धर्मावच्छिन्ना भवेत्। कारणतायां कारणतात्वं विद्यते। ततश्च 'यत्र यत्र कारणतात्वं' 'तत्र तत्र किञ्चिद्धर्मावच्छिन्नत्वम्' इति व्याप्तिः गृहीता। यथा- घटत्वावच्छिन्नकार्यतानिरुपितकारणता दण्डे अस्ति, सा कारणता दण्डत्वधर्मेण अवच्छिन्ना। इत्थं न्यायसिद्धं यत्; द्रव्यकर्मभिन्नसामान्यवन्निष्ठकारणतायाः अप्येकः अवच्छिन्नो धर्मो विद्यते। तद्धर्मो रूपत्वरसत्वादिरूपो न

[1] "रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्ध्यः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः"।

**-वैशेषिकसूत्रम् १.१.६ ।**

[2] "रूपादयः सप्तदश कण्ठोक्ताः सूत्रकारेण। अभ्युपगमसिद्धान्तन्यायेनान्येऽपि सप्त सिद्धगुणभावाः......एवं कण्ठोक्त्या समुच्चयेन चैकतया चतुर्विंशतिगुणा व्यवहर्तव्याः"। **-किरणावली, शिवचन्द्रः, गुणविभागः।**

[3] "गुणत्वं रूपादिषु रत्नत्वमिव उपदेशसहकारिणा प्रत्यक्षेणैव गृह्यते"।

**-किरणावली, शिवचन्द्रः, गुणविभागः।**

भवति, यतो धर्मोऽयं सर्वगुणेष्वविद्यमानत्वात् कारणतापेक्षया न्यूनदेशस्थितः। तद्धर्मः सत्ताजातिरपि न सम्भवति, यतस्सत्ताजातिः गुणातिरिक्तयोः द्रव्यकर्मणोः विद्यमानतया कारणतापेक्षया अधिकदेशवृत्तिः। गुणनिष्ठकारणतायाः अन्यूनानतिरिक्तदेशवृत्तितया गुणत्वं तदवच्छेदको धर्मो भवति, किञ्च बाधकाभावाद् गुणत्वजातिः सिद्धा।

अनुमानमिदं टीकाकारैर्बहुविधं चर्चितम्। द्रव्यकर्मभिन्नसामान्यवान् इत्यनेन अन्तिमे गुण एव प्राप्यते। ततस्सारल्येन गुणनिष्ठकारणता पक्षरूपेण गृहीता चेल्लाघवो भवति। किन्तु गुरुभूता द्रव्यकर्मभिन्नसामान्यवन्निष्ठकारणता कथं गृहीता? तदुत्तरे वक्तव्यं खलु गुणत्वजातेः सिद्धिर्यावद् गुणनिष्ठकारणतात्वरूपेण पक्षत्वन्न सिध्यते। गुणत्वजातिरेव गुणस्य लक्षणम्; अतो गुणत्वसिद्धेर्प्राक् गुणशब्दस्य व्यावहारो न भवेत्। तेन हेतुना सिद्धधर्मपुरस्कारे गुणः बोध्यते। केवलं द्रव्यभिन्नसामान्यवन्निष्ठकारणता पक्षरूपे गृहीते सति गुणत्वसिद्धिर्न भवति। यतोहि तत्कारणता कर्मण्यप्यस्ति, कर्मणो द्रव्यभिन्नसामान्यवत्त्वात्। पुनश्च कर्मभिन्नसामान्यवन्निष्ठकारणतापि पक्षो न सम्भवति, तत्कारणतायाः द्रव्ये विद्यमानतया। तस्माद् द्रव्यकर्मणो उभयोर्भेदः लक्षणे सन्निवेशितः। सामान्यादयः पदार्थाः स्वस्वप्रत्यक्षविषये कारणताया आश्रयाः भवन्ति। अतः केवलं द्रव्यकर्मभिन्ननिष्ठकारणता पक्षरूपे गृहीते सति तत्कारणतायाः विद्यमानतया सामान्यादावतिव्याप्तिर्जाता। तस्मात् सामान्यवदित्यपि लक्षणे योजनीयः।

वैशेषिकमते कारणता त्रिधा समवाय्यसमवायिनिमित्तभेदात्। समवायिकारणतायाः केवलं द्रव्यवृत्तितया[4]। अस्मदालोचिता गुणनिष्ठकारणता समवायिकारणरूपा न भवति। इच्छाद्यात्मविशेषगुणानाम् असमवायिकारणतायाः विरहाद् असमवायिकारणतापि न सम्भवति। निमित्तकारणता ग्रहणे सत्यपि निर्दोष इति वक्तुं अशक्तः। यथा- गुणत्वविशिष्टम् अणुपरिमाणं कदापि कारणन्न भवति।

वस्तुतस्तु अनुमानेऽस्मिन् पक्षनिर्णये टीकाकारैः विविधानि मतान्युपस्थापितानि। आपाततो गुणनिष्ठकारणतैव पक्ष इति सिद्धान्तः संगृह्यते। किन्त्वत्रापि आपत्तिर्यद् रूपादारभ्य शब्दो यावत् सर्वसाधारणी कापि कारणता नैव सम्भवति। रूपादयः सर्वे गुणाः पृथक् धर्मावच्छिन्नतया, तेषु पृथक्कारणता प्रत्यक्षसिद्धा; यथा- रूपनिष्ठकारणता, रसनिष्ठकारणता चेति। अर्थात् सामान्यतो गुणनिष्ठकारणता काचिन्नास्तीति। तस्माद् अनुमाने पक्षाप्रसिद्धिदोषात् सर्वगुणवृत्तिः गुणत्वन्न सिध्यते। अत्र सकलगुणवृत्तिं कारणतां न संगृह्य

---

[4] "द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम्"।

–वैशेषिकसूत्रम्, १.१.१८।

प्रत्येकगुणवृत्तिकारणताकूटः तदन्यतमो वा पक्षीकृत्य केचित्तु तद्दोषो निवारितः[5]। अन्यैश्च विरुध्यते यत् सिद्धान्तोऽयम् अङ्गीकृते सति अप्रामाण्यजातिस्वीकारापत्तिर्स्यात्[6]। यथा अनुमितं 'मनोभिन्नवृत्तिर्या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्त्वात्'। मनोभिन्नस्तावत् पृथिवीत आत्मा यावदष्ट द्रव्याणि। अष्टद्रव्येषु प्रत्येकद्रव्यवृत्तिकारणतासमूहं तदन्यतमं वा पक्षीकृत्य कृतेऽनुमाने गुणत्वसिद्धिवत् पृथिव्याद्यष्टद्रव्ये अवच्छेदकरूपेण कापि जातिः सिध्यते, किन्तु तदसमीचिना।

अत्र द्विविधं समाधानं ब्रुवता प्रभाटीकाकारेण गुरोर्मतमनुसृत्य अन्ते च स्वमतं प्रदत्तम् [7]। गुणस्य उद्देशप्रकरणे आक्षेपसमाधानस्य परम्परा प्रदर्श्य रामरुद्रीकारेण समाधानं दीयते[8]। प्राचीननैयायिकैः अनुमानस्य करणरूपे ज्ञायमानं लिङ्गं स्वीकृतम्। नव्यानां मतानुसारं व्याप्तिज्ञानमेव अनुमितिकरणम्। प्रचीनमतमनुसृत्य गुणत्वजातिसिद्धेः अनुमानं प्रदर्शयता विश्वनाथेन कृतेऽनुमाने पक्षाप्रसिद्धिदोषो न सञ्जातः[9]।

श्रीधरभट्टेन अन्धकारस्य रूपविशेषत्वं स्वीकृतम्[10]। अन्धकारो रूपविशेषश्चेत् तदाश्रयाभावः प्रसज्यते। निशिकाले शून्यस्थाने अन्धकारप्रतीते आश्रयः को भवति? वायुश्चेत् तस्य अप्रत्यक्षतया रूपविशेषस्य अन्धकारस्यापि अप्रत्यक्षतापत्तिः स्यात्। ननु आकाशः तदाश्रय इति चेत् तत्रापि आकाशस्य अप्रत्यक्षतया अन्धकारस्य अप्रत्यक्षतापत्तिः प्रसज्येत। तदर्थं अन्धकारो न खलु रूपविशेषः किन्तु रूपाभाव इति बोध्यः।

---

[5] "रूपादिषु सर्वेषु एककारणताया अप्रसिद्धत्वेऽपि प्रत्येकं प्रसिद्धा याः कारणताः तासां निरुक्तरूपेण तावदन्यतमत्वेन वा पक्षत्वसम्भवात् नोक्तदोष इति"।

**–भाषापरिच्छेदे सप्तपदार्थ, मृणालकान्ति-गङ्गोपाध्यायः, पृष्ठासंख्या ४० ।**

[6] "तथा सति पृथिव्याद्यात्मान्तवृत्तिप्रत्येककारणताया मनोभिन्नवृत्तित्वेन तावदन्यतमत्वेन वा पक्षीकृत्य....अन्यूनातिरिक्तवृत्तिजातिस्वीकारापत्तेः"। **–भाषापरिच्छेदे सप्तपदार्थ, मृणालकान्ति-गङ्गोपाध्यायः, पृष्ठासंख्या ४१ ।**

[7] "गुणत्वविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति गुणत्वप्रकारकनिश्चयत्वेन, गुणत्वप्रकारकबुद्धित्वावच्छिन्नं प्रति गुणत्वज्ञानत्वेन वा हेतुतायाः सकलनैयायिकाभिमततया तादृशकारणतैव पक्षः"।

**–प्रभाटीका, शङ्कररामशास्त्री, चौ.सं.प्र. , गुणखण्डः ।**

[8] "ज्ञायमानलिङ्गकरणतावादिमताभिप्रायेणैव तदभिधानात्"।

**–रामरुद्री टीका, शङ्कररामशास्त्री, चौ.सं.प्र. , गुणप्रकरणम् ।**

[9] "आचार्यमतानुयायिनस्तु ज्ञायमानलिङ्गस्यानुमितिकरणतया द्रव्यमितरभिन्नमित्याकारिकायां द्रव्यत्वावच्छेदेन इतरभेदविधेयकानुमितौ.....पक्षत्वसम्भव इत्याहुः"।

**–सिद्धान्तमुक्तावली, श्रीकृष्णवल्लभाचार्यः, चौ.सं.सं. , गुणखण्डः ।**

[10] "तस्माद्रूपविशेषोऽयमत्यन्तं तेजोभावे सति सर्व्वतः समारोपितस्तम इति प्रतीयते" ।

**–न्यायकन्दली, जे. एस् जेटलि एवं वि. जि. पारिख, वरोदा, पृष्ठासंख्या ३४ ।**

**गुणस्य वैशिष्ट्यम्**

गुणस्य साधारणवैशिष्ट्यानि उक्तानि हि प्रशस्तपादेन[11]। गुणस्य प्रथमं वैशिष्ट्यं खलु द्रव्याश्रितत्वम्। गुणः समवायसम्बन्धेन केवलमेव द्रव्ये तिष्ठति न त्वन्यत्र। द्रव्याश्रितत्वमित्यस्य साधारणोऽर्थ ग्रहणे सति कर्मसामान्यादावतिव्याप्तिः जायते। कर्मसामान्ये समवायसम्बन्धेन द्रव्याश्रिते भवतः। अतः कर्म, सामान्यञ्च द्रव्याश्रितमिति वक्तुं शक्यते। तन्निवारणाय विश्वनाथेन कथितम् द्रव्यत्वव्यापकतायाः अवच्छेदकसत्ताभिन्नजातिमत्त्वमिति [12]। 'यत्र यत्र द्रव्यत्वं' 'तत्र तत्र गुणः' इति नियमोऽयम् अव्याभिचारी। द्रव्यत्वं नवद्रव्ये तिष्ठति, गुणः अपि नवद्रव्यवृत्तिर्भवति। गुणहीनो द्रव्यन्न कदापि दृश्यते; तस्माच्च सिध्यते द्रव्यव्यापको गुण इति सिद्धः। गुणनिष्ठव्यापकता निरवच्छिन्ना न भवति; तदवच्छेदिका सकलगुणवृत्तिरेका जातिरेव भवेत्। सत्तागुणभेदे एतादृशी जातिर्द्विधा प्राप्यते। किन्तु लक्षणे सत्ताभिन्नत्वं जातेर्विशेषणरूपेणोल्लेखतया सत्तां परित्यज्य गुणत्वजातिरेव ग्रहणीया। तस्य गुणत्वाश्रयः केवलमेव गुणो, न खलु कर्म नापि सामान्यम्। अत एतदर्थे द्रव्याश्रितत्वस्यातिव्याप्तिर्न घटते। किञ्चिद् भिन्नप्रकारेऽपि प्रकाशयितुं शक्नुमः इत्थम्- "द्रव्यत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदिका या सत्ताभिन्ना जातिः तादृशजातिमत्त्वं द्रव्याश्रितत्वम्"। द्रव्यत्वाधिकरणं खलु द्रव्यम्, सर्वद्रव्ये एव कश्चित् गुणो विद्यते, कस्मिंश्चिदपि द्रव्ये गुणो नास्तीति अत्यन्ताभावो नैव प्राप्यते। तस्मात् द्रव्यसमानाधिकरणात्यन्ताभावस्य प्रतियोगिरूपेण गुणमुपस्थापयितुन्न शक्नोमि। गुणत्वं तादृगभावस्य प्रतियोगिताया अवच्छेदको न भवन् अनवच्छेदक एव भवेत्; तदवत्त्वन्तु गुणेऽस्तीति।

'द्रव्यत्वव्यापकतावच्छेदकजातिमत्त्वम्' इत्युक्ते सति द्रव्ये अतिव्याप्तिर्जायते। कारणं हि सत्तापि तादृक् व्यापकतायाः अवच्छेदिका जातिः; तत् सत्ताजातिमत्त्वं द्रव्ये विद्यते। केवलं 'सत्ताभिन्नजातिमत्वम्' इत्युक्ते सति द्रव्यकर्मण्यतिव्याप्तिर्जायते। कारणं खलु द्रव्यत्वं कर्मत्वञ्च सत्ताभिन्नजातिरेव, एवं तद्वत्त्वन्तु द्रव्यकर्मण्यस्ति। किन्तु 'द्रव्यत्वव्यापकतावच्छेदक' इति विशेषणं संयुज्य तद्दोषो निवार्यते। कारणं हि द्रव्यत्वकर्मत्वे तद्व्यापकताया अवच्छेदकं न भवतः। 'यत्र यत्र द्रव्यत्वं तत्र तत्र द्रव्यम्' 'यत्र यत्र द्रव्यत्वं तत्र तत्र कर्म' इति नियमो व्याभिचारदोषदुष्टः। यथा- आकाशे द्रव्यत्वमस्ति, किन्त्वाकाशे कश्चित् द्रव्यं कर्म वा न तिष्ठति। अतो द्रव्यकर्मे

---

[11] "रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं निर्गुणत्वं निष्क्रियत्वम्" ।

**–प्रशस्तपादभाष्यम्, ढुण्डिराजशास्त्री, चौ.सं.सं., गुणविभागः ।**

[12] "द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः"।

**–सिद्धान्तमुक्तावली, श्रीकृष्णवल्लभाचार्यः, चौ.सं.सं. , गुणखण्डः ।**

द्रव्यत्वस्य अव्यापको भवति; व्यापकताभावात् द्रव्यत्वकर्मत्वे व्यापकतावच्छेदकं धर्मं न सम्भवतः। लक्षणे जातिपदमपि अपेक्षते, अन्यथा द्रव्यत्वसामान्ययोः अतिव्याप्तिर्जायते। द्रव्यत्वं स्वाश्रितद्रव्यत्वव्यापकतया द्रव्यत्वत्ववत्वं भवति। जातिपदनिवेशने द्रव्यत्वत्वं तदवच्छेदको धर्मो न भवति; कारणं हि द्रव्यत्वत्वं धर्ममात्रमेव न खलु जातिरिति; सामान्येऽपि पूर्ववत् द्रष्टव्यम्। प्रभाटीकाकारस्य मते द्रव्याश्रितत्वस्य यत् निर्वचनं तत्तु गौरवदोषग्रस्त एव; तन्मते 'गगनवृत्तिसमवेतसत्ताभिन्नजातिमत्त्वमिति' निर्दोषलक्षणम्।

प्राचीनाः अपि गुणभिन्नेऽतिव्याप्तिवारणाय प्रयत्नवन्त आसन्। उक्तं हि व्योमशिवाचार्येण- 'द्रव्याश्रितत्वम्' पदं समासबद्धतया द्रव्येष्वाश्रितत्वमिति विग्रहवाक्यं ग्रहणीयम् । अवधारणार्थकम् एव-शब्दं संयुज्य 'द्रव्येषु एव' 'आश्रितत्वमेव' इत्यंशद्वयं मिलित्वा यः पदार्थो बोध्यते, तस्यैव साधर्म्यं द्रव्याश्रितत्वम् इत्यर्थः। प्रथमांशो द्रव्यपक्षे संयुज्यते, यतो द्रव्यं द्रव्याश्रितं भवति घटकपालवत्; किन्तु द्वितीयांशो नैव प्रयुज्यते आकाशस्य अनाश्रितत्वात्। कर्मापि द्रव्ये तिष्ठति परन्तु सर्वद्रव्यवृत्तिर्न भवेत्; यथात्मनि कर्म नास्त्येव। विशेषस्तु द्रव्यवृत्तिरेव किन्तु नित्यद्रव्यवृत्तितया द्वितीयांशः अप्रयोज्यः समवायपक्षे द्वितीयांशः प्रयुज्यते सर्वदा आश्रितत्वात् किन्तु प्रथमांश अप्रयोज्यो; यतः समवायो द्रव्यव्यतिरिच्य गुणकर्मण्यपि विद्यते। सामान्यस्यापि समवायवच्चिन्तणीयम्। केवलन्तु गुणो द्रव्ये एव तिष्ठति एवञ्चाश्रितो भवति; एतदर्थे गुणपदार्थः सर्वद्रव्यवृत्तिरित्यर्थः। किरणावल्यामपि तथागतयुक्त्या विषयोऽयमुपस्थाप्यते।

गुणस्य द्वितीयं वैशिष्ट्यं तावत् निर्गुणत्वमिति। साधारणतया एतदर्थो ग्रहणे सति कर्मादावतिव्याप्तिर्स्यात्। तदर्थं विश्वनाथेनास्य विशेषार्थः परिकीर्त्यते- "सामान्यवत्त्वे सति कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम्" । अर्थात् सामान्यविशिष्टः कर्मभिन्नश्च भवन् या गुणेऽनाश्रिता, तदेव निर्गुणत्वमिति। द्रव्यन्तु सामान्यविशिष्टं कर्मभिन्नञ्च भवति, कदापि गुणस्यानाश्रयो न भवतीत्यस्मात् द्रव्ये नातिव्याप्तिः। सामान्यादिपदार्थाः कर्मभिन्नाः, गुणस्यानाश्रयाश्च भवन्ति; किन्तु सामान्यवत्ताभावात्तत्र नातिव्याप्तिः। कर्मैव सामान्यवान्, गुणस्यानाश्रयश्च भवन् कर्मभिन्नो न भवेदतो नातिव्याप्तिरत्र। केवलमेव गुणे तल्लक्षणसमन्वयतया निर्गुणत्वं तस्य वैशिष्ट्यमिति मन्तव्यम्। प्रभाटीकाकारेण मतमिदं समालोचितं यदुत्पत्तिकालिनघटे अतिव्याप्तिर्भवति। द्रव्यस्य समवायिकारणतया गुणोत्पत्तेर्प्राक्क्षणे द्रव्यं निर्गुणं तिष्ठति। तत्क्षणावच्छिन्ननिर्गुणद्रव्ये गुणात्यन्ताभाववत्त्वं संघटते, इत्यस्मात् अत्रातिव्याप्तिः। तन्निवारणाय कथ्यते हि- "गुणाधिकरणावृत्तित्वविशिष्टगुणात्यन्ताभाववत्त्वमिति"। उत्पत्तिकालिनघटः परक्षणे गुणाधिकरणमेव भवति न खलु गुणव्यधिकरणमतो नातिव्याप्तिरिति। प्रभाटीकाकार एतल्लक्षणं लाघविकरोति यत् 'कर्मावृत्तित्वे सति समवायसम्बन्धे गुणाधिकरणावृत्तित्वविशिष्टवत्त्वमेव' निर्गुणत्वमिति। एतल्लक्षणं कृते सति प्रथमतः

'सामान्यवत्वे सति' इत्यस्य प्रयोजनं नास्त्येव। द्वितीयतः पूर्वलक्षणे विशेष्यविशेषणभावस्य असामञ्जस्यतया लक्षणत्रयापत्तिर्स्यात्। वस्तुतस्तु प्रभाटीकाकारस्य यन्मतं तत्तु विश्वनाथेनान्यत्र सूचितम् इत्यस्माकं वक्तव्यमेव[13]। साधर्म्यप्रकरणे तेन कथितो 'गुणादिनिर्गुणक्रियः' इति; मुक्तावल्यामपि विश्लेषणात्मिकालोचना सम्प्राप्ता। गुणे गुणो न तिष्ठतीति सिद्धान्तमनुसृत्य व्योमशिवाचार्येण युक्तिः प्रदर्शिता। रूपादिगुणाः समवायसम्बन्धे द्रव्ये एवोत्पद्यन्ते। किन्तु रूपादिः रूपादावेव उत्पद्यते तथा रूपादिः रूपादेरधिकरणं भूयते; एतादृक् दृष्टान्तं नैव प्रमाणसिद्धम्। 'रूपवद्द्रव्यं' न तु 'रूपवत् रूपम्' इति अस्माभिरनुभूतम्। तथापि कश्चित् मन्यते रूपोत्पत्तौ रूपमेव समवायिकारणमिति, तत्र प्रश्नः स्यादसमवायिकारणं किं भवति? साधारणतया अवयविरूपं प्रति अवयवरूपम् असमवायिकारणरूपेण गृहीतम्। किन्तु विपक्षवादिनो मते तद्रूपं स्वगतरूपं प्रति समवायिकारणं भवति। वस्तुतस्तु एकं रूपमेकक्षणे समवाय्यसमवायिकारणन्न सम्भवति। पुनश्चावयवसंयोग अवयविन उत्पत्तौ असमवायिकारणं भवति, किन्तु तत्संयोगे रूपोत्पत्तौ कारणता नास्त्येव। अत असमवायिकारणताभावात् केवलं समवायिकारणेन रूपमुत्पद्यते इति सिद्धान्तमयौक्तिकम्। कारणं हि कार्यमात्रमेवानेककारणसाध्यं भवति। श्रीधराचार्यस्यवक्तव्यं खलु; गुणे गुणोत्पत्तिरङ्गीकृते सति गुणे गुणान्तररूपानवस्था स्यात् [14]।

उदयनाचार्येण विविधगुणमुदाहृत्य एतदालोचितम्। प्रागेव कथितः समानजातीयगुणे गुणोत्पत्तिः स्वीकृते सत्यनवस्थादोषो भवति। विजातीयगुणपक्षे रूपे गन्धोत्पत्तिरङ्गीकृते सति पृथिवीवद् रूपेऽपि मूर्तत्वापत्तिः स्यात्। किन्तु रूपं समानदेशवृत्तितया मूर्तिविशिष्टन्न भवति[15]। द्वौ मूर्तपदार्थौ समानदेशवृत्ती न सम्भवतः। प्रत्येकमूर्तपदार्थस्य भिन्नदेशवृत्तित्वं प्रत्यक्षसिद्धमेव। तस्मात् समानदेशता मूर्तत्वस्य विरोधी इत्यर्थः। समानदेशत्वमस्ति चेत् मूर्तत्वन्न तिष्ठति। किन्तु रूपं तदाश्रयेण साकं समानदेशवृत्तिर्भवति इति वर्धमानोपाध्यायेन प्रकाशटीकायां स्पष्टतयोल्लिख्यते[16]। अतो रूपादौ रसादीनामुत्पत्तिः अप्रामाणिकी।

---

[13] "यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तम्, क्रियाशून्यत्वञ्च गगनादावतिव्याप्तम्, तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं च तदर्थः। न हि घटत्वादिकं द्रव्यत्वादिकं वा गुणवदवृत्ति कर्मवदवृत्ति वा, किन्तु गुणत्वादिकं तथा। आकाशत्वादिकन्तु न पदार्थविभाजकोपाधिः"।

**–सिद्धान्तमुक्तावली, श्रीकृष्णवल्लभाचार्यः, चौ.सं.सं. , गुणखण्डः।**

[14] "एवं निर्गुणत्वं गुणरहितत्वम्, गुणानां स्वरूपम्, तेषां स्वात्मनि गुणान्तरानारम्भकत्वात्, तदनारम्भकत्वं च रूपादिषु रूपाद्यन्तरानुपलब्धेरनवस्थानाच्च"। **–न्यायकन्दली, जे. एस् जेटलि एवं वि. जि. पारिख, वरोदा, गुणप्रकरणम्।**

[15] "रूपादीनां समानदेशत्वात् अध्यवसेयः। मूर्तत्वसमानदेशत्वयोः सहजविरोधात्"।

**–किरणावली, शिवचन्द्रः, गुणखण्डः।**

[16] "एतत्पटाश्रिततन्तुरूपं यदि मूर्तं स्यात्, एतत्तन्तावेतत्पटस्य समानदेशत्वं न स्यादिति क्रमेणापादानम्"।

**–प्रकाशटीका, गुणप्रकरणम्।**

दुःखाद्यात्मविशेषगुणानाम् आत्माभिन्ने अनाश्रयता प्रमाणसिद्धा। किञ्च शब्दगुणः केवलमेव आकाशे उत्पद्यते न त्वन्यत्र, एतदपि प्रमाणीतम्। तस्मात् कस्मिंश्चिद् गुणे विजातीयगुणोत्पत्तेः प्रक्रिया निरस्ता। गुणे गुणोत्पत्तिः अङ्गीकृते सति समवायिकारणतया गुणोऽपि द्रव्यरूपेण परिगणितो भवतीति किरणावलीकारेण भाषितः। गुणः समवायसम्बन्धे यस्मिन् उत्पद्यते, तदधिकरणमेव कार्यगुणस्य समवायिकारणम्। यथा- तन्त्वधिकरणे पटोत्पत्तितया पटस्य समवायिकारणन्तु तन्तुरेव। यतः कणादमते समवायिकारणता केवलमेव द्रव्यवृत्तिरिति कृत्वा कारणगुणस्य समवायिकारणतया अधिकरणरूपो गुणः समवायिकारणं भवति। ततश्च गुणस्य द्रव्यापत्तिः जाता। विरुद्धवादिनो मते इष्टोऽयमिति चेत् तत्रापि रूपे परिमाणापत्तिः प्रसज्येत। रूपस्य द्रव्यत्वम् अङ्गीकृते सति परिमाणमपि द्रव्यं भवति, कारणं हि परिमाणन्तु सर्वद्रव्यवृत्तिगुण एव। तदा प्रश्नः स्यात् तत्परिमाणम् अवच्छिन्नम् उत निरवच्छिन्नम्? अवच्छिन्नश्चेत् मूर्तपदार्थः स्वीकर्तव्यः, किन्तु समानदेशत्वाद् रूपस्य अमूर्तता प्रागेवालोचिता। निरवच्छिन्नश्चेत् परममहत्परिमाणवत्तया आत्मवत् बहिरिन्द्रियेन रूपम् अप्रत्यक्षभूतं भवति। किञ्च द्रव्यत्वे सति रूपस्य अवयवितया कार्यभूतरूपं रूपावयवे एव तिष्ठति न तु द्रव्ये। फलतो द्रव्यस्य रूपहीनतापत्तिः प्रसज्येत, या खलु असमीचीना। सिद्धान्तेऽस्मिन् आपत्तिर्भवेत्- गुणे गुणस्य अवाधितप्रतीतिः प्रत्यक्षसिद्धा, 'एको घटः' 'एकं रूपम्' इति। समाधानमत्र एकार्थसमवायसम्बन्धवशात् तत्प्रतीतिर्भवति।

निष्क्रियत्वमेव गुणस्य तृतीयं वैशिष्ट्यम्। गुणे क्रियापि न विद्यते, सा तु कर्मपदार्थवृत्तिः। आकाशस्य क्रियाविरहात् 'क्रियात्यन्ताभाववत्त्वम्' इति कृत्वा आकाशेऽपि तल्लक्षणं समन्वयते। तन्निवृत्त्यर्थं विश्वनाथेन 'कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वम्' इत्युक्तम्। कर्मवदित्यनेन द्रव्यं बोध्यते, द्रव्ये अविद्यमान् पदार्थविभाजकोपाधिरूपेण गुणत्वकर्मत्वादिः गृह्यते, तद्वत्त्वं गुणे अस्तीति। अन्यथा आकाशे अतिव्याप्तिः जाता। क्रियाविरहाद् आकाशत्वं कर्मवदवृत्तिधर्मो भवितुमर्हति, किन्त्वाकाशत्वं द्रव्यविभाजकोपाधिः न खलु पदार्थविभाजकोपाधिरिति। तस्माद् आकाशे अतिव्याप्तिः निवारिता। अत्र निष्क्रियत्वं न केवलं गुणसाधर्म्यम्, अपि तु अन्यपदार्थानां साधर्म्यं भवति। अतो निष्क्रियत्वं गुणसाधर्म्यग्रहणाय एतल्लक्षणं करणीयं- 'सामान्यवत्वे सति कर्मान्यत्वे च सति कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं निष्क्रियत्वम्' इति। व्योमशिवाचार्यस्य मते क्रिया मूर्तपदार्थस्य धर्मरेव, अमूर्तपदार्थे कर्मवृत्तिर्न सम्भवति; किन्तु रूपममूर्तपदार्थः। ननु रूपादौ गतिक्रियाप्रतीतिः कथम् अनुभूता? इति चेत् तत्प्रतीति आश्रयद्रव्यस्य गत्या एवोत्पादिता। गतिस्तु द्रव्यवृत्तिः, तद् द्रव्ये गुणोऽपि विद्यते। फलतो गुणस्य गतिविशिष्टता अस्माभिः अनुभूता इति शम्।

**उपसंहृतिः**:- पारिशेष्यात् वक्तुं शक्यते यत् 'द्रव्यकर्मभिन्ने सामान्यवति या सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, दण्डनिष्ठघटकारणतावत्' इति विश्वनाथकृतगुणत्वजातिसाधकमनुमानं समीचीनमेव। यदयप्यनुमाने अस्मिन् पक्षाप्रसिद्धिदोषो उथ्थापितः तथापि प्रचीनमतमनुसृत्य अनुमानं प्रदर्शयता विश्वनाथेन कृतेऽनुमाने पक्षाप्रसिद्धिदोषो निवारितः। तदनु द्रव्याश्रितत्वं निर्गुणत्वं निष्क्रियत्वञ्चैव गुणस्य साधारणवैशिष्ट्यमिति वैशेषिकमतानुयायिभिः समर्थितपरवर्तिटीकाकर्तृभिः आलोचितमिति शिवम्।

## ग्रन्थपञ्जी


संस्कृतग्रन्थाः

अन्नंभट्टः. *तर्कसंग्रहः.* (सम्पा.). श्रीगोविन्दाचार्य. वाराणसी : चौखम्भा सुरभारती प्रकाशन, २०१९.

उदयनाचार्यः. *किरणावली.* (सम्पा.). नरेन्द्रचन्द्रवेदान्ततीर्थ. कलिकाता : एशियाटिक सोसाइटि, २००२.

उदयनाचार्यः. *न्यायकुसुमाञ्जलिः.* (सम्पा.). पद्मप्रसाद उपाध्याय एवं ढुण्ढिराज शास्त्री. तृतीयसंस्करण. वाराणसी : चौखम्भा संस्कृत भवन, २०१५.

उद्योत्करः. *न्यायवार्त्तिकम्.* (सम्पा.). विन्ध्येश्वरीप्रसाद द्विवेदी. द्वितीयसंस्करण. वाराणसी : चौखम्भा संस्कृत भवन, २००७.

केशवमिश्रः. *तर्कभाषा.* (सम्पा.). गङ्गाधरकरन्यायाचार्यः. तृतीयसंस्करण. कलिकाता : महाबोधि-बुक-एजेन्सि, २०१९.

गङ्गेशोपाध्यायः. *तत्त्वचिन्तामणिः.* (सम्पा.). महाप्रभुलालगोस्वामी. वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९१.

गोतमः. *न्यायदर्शनम्.* (सम्पा.). फणिभूषण-तर्कवागीशः. कलिकाता : , पश्चिमवङ्ग-राज्य-पुस्तक-पर्षद, २०१८.

पतञ्जलिः. *पातञ्जलयोगदर्शनम्.* (सम्पा.). स्वामी भर्गानन्द. तृतीयसंस्करण. कलिकाता : उद्बोधन कार्यालय, २०१६.

प्रशस्तदेवाचार्यः. *पदार्थधर्मसंग्रहः.* (सम्पा.). नारायणमिश्र. वाराणसी : चौखम्भा संस्कृत संस्थान, २०१६.

भट्टोजिदीक्षितः. *वैयाकरण सिद्धान्तकौमुदी.* (सम्पा.). श्रीबालकृष्णपञ्चोली. द्वितीयसंस्करण. वाराणसी : चौखम्भा संस्कृत संस्थान, २०१२.

माधवाचार्यः. *सर्वदर्शनसंग्रहः.* (सम्पा.). उमाशङ्करशर्मार्ऋषि. वाराणसी : चौखम्बा विद्याभवन, २०१६.

मृणालकान्तिगङ्गोपाध्यायः. *भाषापरिच्छेदे सप्तपदार्थ.* प्रथमसंस्करण. कलिकाता : संस्कृत बुक डिपो, १४२१.

रघुनाथशिरोमणिः. *पदार्थतत्त्वनिरूपणम्.* (सम्पा.). मधुसूदन भट्टाचार्य. कलिकाता : संस्कृत कलेज, १९७६.

वाचस्पतिमिश्रः. *न्यायवार्तिकतात्पर्यटीका.* (सम्पा.). राजेश्वरशास्त्री द्राविढ. तृतीयसंस्करण. वाराणसी : चौखम्भा संस्कृत भवन, २०१३.

वाचस्पतिमिश्रः. *सांख्यतत्त्वकौमुदी.* (सम्पा.). नारायणचन्द्र गोस्वामी. कलिकाता : संस्कृत पुस्तक भाण्डार, २०१६.

वादरायणः. *ब्रह्मसूत्र-शाङ्करभाष्यम्.* (सम्पा.). स्वामी योगिन्द्रानन्द. द्वितीयभाग. वाराणसी : चौखम्बा विद्याभवन, २०१७.

विश्वनाथन्यायपञ्चाननः. *कारिकावली.* (सम्पा.). सी शङ्कररामशास्त्री. द्वितीयसंस्करण. दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१६.

व्योमशिवाचार्यः. *व्योमवती.* (सम्पा.). गौरीनाथशास्त्री. वाराणसी : चौखम्भा संस्कृत संस्थान, १९८४.

शङ्करमिश्रः. *वैशेषिकसूत्रोपस्कारः.* (सम्पा.). नारायणमिश्र. वाराणसी : चौखम्भा प्रकाशन, २०१९.

शिवादित्यः. *सप्तपदार्थी.* (सम्पा.). तपनशङ्कर भट्टाचार्य. कलिकाता : संस्कृत-बुक-डिपो, २०१२.

श्रीधरभट्टः. *न्यायकन्दली.* (सम्पा.). ब्रह्मचारी-मेधाचैतन्य. कलिकाता : संस्कृत-बुक-डिपो, २०२१.

श्रीहर्षः. *खण्डनखण्डखाद्यम्.* (सम्पा.). नविकान्त झा. द्वितीयसंस्करण. वाराणसी : चौखम्भा संस्कृत संस्थान, २००५.

आङ्लग्रन्थाः

Bhaduri, Sadananda. *Nyaya - Vaisesika Metaphysics*. First Reprint. Pune: Bhandarkar Oriental Research Institute, 2021.

Dasgupta, Surendranath. *A History of Indian Philosophy.* 6th Edition. Delhi : Motilal Banarsidass, 2015.

Potter, Karl H. *Encyclopedia of Indian Philosophies.* Ed. Sibajiban Bhattacharyya. 1st Edition. Vol. XIII. Delhi : Motilal Banarsidass, 2011.

Randle, H.N. *Indian Logic in Early Schools*. First Indian Edition. New Delhi: Munshiram Manoharlal Publishers, 1976.

# लक्षणग्रन्थेषु दृश्यकाव्यस्वरूपभेदाश्च

**डॉ. प्रदीपकुमारवाग्**
**सहाचार्यः, साहित्यविभागः**
**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः**

**सारांशः –**

कमपि वैदिक-पौराणिक-सामाजिक-ऐतिहासिक-काल्पनिकं वा विषयवस्तुं स्वीकृत्य यदि तस्य काव्यरचना क्रियते एवं तेषाम् अभिनयमाध्यमेन मञ्चस्य क्रियते तर्हि तत् दृश्यकाव्यम् इत्युच्यते। एतादृशानां दृश्यकाव्यानां भेदः प्रभेदः पत्रेऽस्मिन् निरूपितं वर्तत

## संस्कृतसाहित्ये काव्यानां स्वरूपं भेदाश्च -

परमपुरुषार्थसिद्धये लोके यानि शास्त्राणि आचार्यैः प्रवर्तितानि, तेषु काव्यं कान्तसम्मितोपदेशरूपत्वाद् अतीवश्लाघ्यमित्यत्र न कस्यापि विप्रतिपत्तिः। काव्यस्य श्रव्यदृश्यभेदेन प्रकारद्वयं प्रसिद्धम्। अनयोर्यावता सौकर्येण दृश्यकाव्येन रसास्वादो जायते, न श्रव्येण इत्यत्रापि सम्प्रति प्रतिपत्तिरेव विदुषामास्ते। अत एव "नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम्" इति सूक्तिः प्रचलिता। पुनश्च सहृदयानां हृदये आह्लादकारकरसानुभूत्युत्पादनमेव काव्यस्योद्देश्यः। रसानुभूतेः मूलकारणं स्थायीभावस्य विभावानुभावव्यभिचारिभावैः सह संयोगं विद्यते – 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः'। दृश्यकाव्ये रङ्गमञ्चे उपस्थितानां पात्राणां वेश-आकार-भावभङ्गिमा-कथनोपकथनादिभिः सजीवं मनोहरं हृदयग्राहकं बिम्बमुत्पद्यते येन सहृदयजनानां रसानुभूतिर्मा निर्बाधमेव न प्रत्युत सुगमं जायते। वस्तुतस्तु काव्यस्य चरमलक्ष्यं नाट्येन

प्राप्यते। एतदेव नाट्यं दृश्यमानतया रूपमित्युच्यते। एतादृशं नाट्यं वा रूपकं रसमाश्रित्यैव दशधा सन्ति। एतत्सर्वं दृश्यकाव्येषु अन्तर्भवति।

कवे: कर्म काव्यम् । तच्च कविसरस्वत्या: विलक्षणसृष्टि: । सा च सृष्टिर्ब्रह्म-सृष्टेरपेक्षया महनीया भवति । कविकल्पनाप्रसृतं काव्यं मुख्यतो द्विविधम् । यथा श्रव्यकाव्यं दृश्यकाव्यञ्च । दर्शनेन्द्रियग्राह्यं काव्यं दृश्यकाव्यमित्युच्यते। श्रवणेन्द्रियग्राह्यं सगार्दिबन्धकाव्यं श्रव्यकाव्यमिति कथ्यते । श्रव्यकाव्यं रूपकोपरूपकभेदाभ्यां द्विविधा परिकल्प्यते । रूपकाणि दशविधानि सन्ति । यथोक्तं साहित्यदर्पणे [१]-

नाटकमथ प्रकरणं भाण-व्यायोग–समवकार–डिमा: ।
ईहामृगा–ऽङ्क- विथि-प्रहसनमिति रूपकाणि दश ।।इति।।

उपरूपकाणि [२] चाष्टादशप्रकारकाणि । तानि यथा -

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्य काव्यानि पेङ्खणं रासकं तथा ।।
संलापकं श्रीगदितं शील्पकञ्च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लिशो भाणिकेति च ।।
अष्टादश प्राहू रुपरूपकाणि मनीषिण:।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ।।इति।।

श्रव्यकाव्यं गद्यपद्यमयत्वभेदेन द्वेधा । यथोक्तं साहित्यदर्पणे [३]-श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधेति। पद्यकाव्यं महाकाव्य-खण्डकाव्य–गीतिकाव्यत्वेन त्रेधा । पद्यकाव्यञ्च काव्याऽऽख्यायिकाभेदेन द्वेधा । गद्यपद्ययोर्भिन्नं गद्यपद्योभयात्मकं काव्यं भवति चम्पूकाव्यं , विरुदं,करम्भकञ्चेति । प्रसङ्गेऽस्मिन्नुक्तं विश्वनाथेन [४] गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते । गद्यपद्यमयी राजस्तुतिर्विरुद उच्यते । करम्भकं तु भाषाभिर्विविधाभिर्विनिर्मितं भवति ।

**१) नाटकम् -** मुखादिपञ्चसन्धिसमन्वितं कौशिकादिचतुर्वृत्तियुक्तं चतु:षष्ट्यङ्गसहितं षट्त्रिंशल्लक्षणैरुपेतं , अलंकारैस्त्रयस्त्रिंशद्भिराशीरादिभिरुपशोभितं महान् शृङ्गारो वीरो वा रसो यस्मिन्

तदेव नाटकमित्युच्यते । तच्च महाभोगमुदात्तरचनायुक्तं साध्वाचारयुक्तं जनप्रियं स्यादिति साहित्यदर्पणकारस्याभिप्रायः । यथोक्तं तेन [५]-

पञ्चसन्धिचतुर्वृत्ति चतुःषष्ट्यङ्गसंयुतम् ।
षट्त्रिंशल्लक्षणोपेतमलङ्कारोपशोभितम् ।।
महारसं महाभोगमुदात्तरचनादिकम् ।
महापुरुषसत्कारं साध्वाचारं जनप्रियम् ।।इत्यादि।

**२) प्रकरणम् -** प्रकर्षेण क्रियते कल्प्यते नेतृफलं वस्तु वा व्यस्तसमस्ततयाऽत्रेति प्रकरणम् । तस्मिन् प्रकरणे वर्णनीयनायकचरितं मर्त्त्यलोकसम्भवयोग्यं न तु स्वर्गलोक-सम्भवदिव्ययोग्यम् । अत्र शृङ्गाररसोऽङ्गी भवेत् । तद्यथा [६]

यत्र कविरात्मबुध्या वस्तुशरीरं नायकञ्चैव !'
औत्पत्तिकं प्रकुरुते प्रकरणमिाति तद् बुधैर्ज्ञेयम् ।।

**३) भाणः**-नाटकवद्भाणस्यापि स्थानं संस्कृतसाहित्ये श्रेष्ठतरमस्ति। अस्मिन् भागे धूर्त्तस्य नायकस्य चरितम् । एकैवाङ्कः, हास्यरसस्य प्राधान्यं , सौभाग्यशौर्यादिवर्णनया शृङ्गारवीरयोः सूचना , भारतीवृत्तिश्च भवति । प्रसङ्गेऽस्मिन्नुक्तं साहित्यदर्पणे [७] यत् -

भाणः स्याद् धूर्त्तचरितो नानावस्थान्तरात्मकः ।
एकाङ्क एक एवात्र निपुणो पण्डितो विटः।। इत्यादि ।।

**४) व्यायोगः-**व्यायोगः लोकप्रसिद्धमितिवृत्तं ,नारीपात्रविरलं ,अनेकपुरुषपात्रता,गर्भविमर्श-सन्ध्यभावः, कौशिकीवृत्तिः , सुविख्यातो नायको हास्यशृङ्गारशान्तभिन्ना रसाश्च भवन्ति । प्रसङ्गेऽस्मिन्नुक्तं साहित्यदर्पणे [८] यत् -

ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः ।।इत्यादि।।

**५) समवकारः -** समवकीर्यन्ते बहवो रसा यत्रेति व्युत्पत्त्या समवकारे सर्वरसावस्थानं सूच्यते। अस्य वृत्तं देवासुरादिख्यातञ्चेति । द्वादश नायकाः वैदिकानि गायत्र्यादीनि छन्दांसि, वीरश्च प्रधानप्रायो रसो भवति । प्रसङ्गेऽस्मिन्नुक्तं साहित्यदर्पणे [९] यत् -वृत्तं समवकारे तु

ख्यातं देवासुराश्रयम् । सन्ध्यो निर्विमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे ।।इत्यादि ।

**६)डिमः-** डिमः सङ्घाते इति नायकसङ्घातव्यापारात्मकत्वाद् डिम इति संज्ञेति धनिकः। अस्येतिवृत्तस्तु विख्यातोऽस्ति । चतुरङ्कः षोडशभिरुद्धतनायकैरुपेतः शान्त-हास्य-शृङ्गार-भिन्नैः रसैरुपस्कृतः ,कौशिक्यतिरिक्तवृत्तिशाली च भवति । अयञ्च मायेन्द्रजालसंग्रामक्रोधो-द्भ्रान्तादिचेष्टितैः भूयिष्ठो भवति । यथोक्तं साहित्यदर्पणे [१०] -

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः ।।
अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः ।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ।।इत्यादि।

**७)ईहामृगः-** अस्मिन्नीहामृगे चत्वारोऽङ्कास्त्रयः सन्धयश्च सङ्घर्षसङ्कुलं कथानकं च भवन्ति। मृगवदलभ्यां नायिकामत्र ईहते इति ईहामृग इति नामकरणम् । अस्य वृत्तं ख्यातं कल्पितं च भवति । यथोक्तं साहित्यदर्पणे [११] -

ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्त्तितः ।
मुखप्रतिमुखे सन्धौ तत्र निर्वहणं तथा ।।इत्यादि ।

**८) अङ्कः**:-अस्मिन्नङ्के करुणरसः प्रधानः पुराणेतिहासप्रसिद्धमितिवृत्तम् । वास्तवयुद्धाभावेऽपि वाग्युद्धमङ्केऽपेक्ष्यते । यथोक्तं साहित्यदर्पणे [१२] -

उत्सृष्टिकाङ्क एकाङ्को नेतारो प्राकृता नराः ।
रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम् ।
प्रख्यातमितिवृत्तञ्च कविबुध्यां प्रपञ्चयेत् ।। इत्यादि ।

**९) वीथी-** वीथी कथाभाणसमानैव । अत्रैकाङ्कः शृङ्गारोनुद्भिन्नरूपो रसः, कौशिकी वृत्तिश्च ।

**१०) प्रहसनम्** - प्रहसने भाणवत् सन्ध्यादयः, निन्दनीयत्वेन वर्ण्यमानानां कल्पितं वृत्तं, विष्कम्भकप्रवेशकराहित्यं हास्यरसप्राधान्यञ्च भवति । यथोक्तं साहित्यदर्पणे [१३] -

भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गकैर्विनिर्मितम् ।
भवेत् प्रहसनं वृत्तं निन्द्यानां कविकल्पितम् ।।इत्यादि ।

**उपरूपकाणि -**

उपरूपकाणां स्वरूपविषये साहित्यदर्पणे [१४] प्रतिपादितं यत् -

नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ।।
स्यादन्तःपुरसम्बन्धा सङ्गीतव्यापृताऽथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ।।इत्यादि ।

उपरूपकाणां भेदविषये प्रतिपादितं यत् -

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेंखणं रासकं तथा ।।
संलापकं श्रीगदितं शिल्पकञ्च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लिशी भाणिकेति च ।।
अष्टाक्षारा प्राहुरुपरूपकाणि मनीषिणः ।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ।।इति।।

एतेषां परिचयः क्रमशः पदीयते ।

१) **नाटिका** - दशरूपके प्रकरणनाटकयोर्मिलितं रूपं नाटिकेत्युच्यते । विख्यातवंशे सत्यपि नायके तस्य वृत्तं कल्पितमुपादीयते । यथा रत्नावली नाटिका भवति ।

२) **त्रोटकम् -** दिव्यमानुषसंश्रयं पञ्चाऽङ्कतोऽन्यूनं , प्रत्यङ्कं सविदूषकञ्च भवति । उक्तं साहित्यदर्पणे [१५] यथा - सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् ।

त्रोटकं नाम तत्प्राहुःप्रत्यङ्कं सविदूषकम् ।।इति ।

३) **गोष्ठी-** पञ्च षड् वा नारीपात्रसमन्विता , नवभिर्दशभिर्वा प्राकृतपात्रैर्युता, एकाङ्कविनिर्मिता च भवति। प्रसङ्गेऽस्मिन्नुक्तं साहित्यदर्पणे [१६] यथा -

प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलंकृता ।
नोदात्तवचना गोष्ठी कौशिकीवृत्तिशालिनी ।।इत्यादि ।

४) **सट्टकम् -** प्राकृतारोषपाद्या नाटिका सट्टकं भवति । अस्य लक्षणं साहित्यदर्पणे [१७]

कृतम् । तद्यथा - सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।

न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः ।।इत्यादि।

यथा कर्पूरमञ्जरी ।

५) **नाट्यरासकम् -** नाट्यरासकमेकाङ्कं बहुताललययुतं भवति । अत्र हास्यरसोऽङ्गी , नायिका वासकसज्जिका । अस्य लक्षणं साहित्यदर्पणे [१८] कृतम् । तद्यथा-

नाट्यरासकमेकाङ्कं बहुताललयस्थितिः।

उदात्तनायकं तद्वत् पीठमर्दोपनायकम् ।।इत्यादि ।

६) **प्रस्थानकम् -** अत्र नायको दासः , उपनायको हीनः, नायिका च दासी भवति । अत्र च सुरापानमेव मुख्यो विषयः । प्रसङ्गेऽस्मिन्नुक्तं साहित्यदर्पणे [१९]यथा-

प्रस्थाने नायको दासो हीनः स्यादुपनायकः ।

दासी च नायिका वृत्तिः कौशिकी भारती तथा ।।इत्यादि।

७) **उल्लाप्यम्** -एतदेकाङ्कमुदात्तनायकं संग्रामरोदनगीतादिबहुलं च भवति ।

८) **काव्यम्** - उपरूपकाख्यं काव्यं तु एकाङ्कं स्त्रीनायकमारभटीहीनं हास्यसङ्कुलं च भवति ।

९) **प्रेङ्खणम्** - गर्भविमर्शरहितं हीननायकं प्रेङ्खणमित्युच्यते । यथोक्तं साहित्यदर्पणे [२०] -

गर्भविमर्शरहितं प्रेङ्खणं हीननायकम् ।

असूत्रधारमेकाङ्कं सवीथ्यङ्गं कलान्वितम् ।।इत्यादि ।

१०) **रासकम्** -एतदुपरूपकं पञ्चपात्रयुकक्तं मुखनिर्वहणान्वितञ्च भवेत् । अत्र च नायको मूर्खो भवति । अत्राप्येकाङ्कः ,सूत्रधारो नास्ति । भारतीकौशिकीवृत्त्योरत्र बाहुल्यं दृश्यते । अस्मिन्् प्रसङ्गे साहित्यदर्पणे [२१] प्रतिपादितं यथा-

रासकं पञ्चपात्रं स्यात् मुखनिर्वहणान्वितम् ।

भाषाविभाषाभूयिष्ठं भारतीकौशिकीयुतम् ।।इत्यादि।

११) **संलापकम् -** एतच्चतुरङ्कविशिष्टं पाखण्डनायकयुतं संग्रामवर्णनपरं शृङ्गारकरुण-भिन्नरसपरञ्च भवति । प्रसङ्गेऽस्मिन् साहित्यदर्पणे [२२] प्रतिपादितं यथा-

संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकाः पुनः ।

पाषण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः ।।इत्यादि।

१२) **श्रीगदितम्** -एतदेकाङ्कयुक्तं प्रख्यातवृत्तमुदात्तनायकयुतं गर्भविमर्शसन्धिभ्यां विवर्जितं भारतीवृत्तिबहुलमुपरूपकम् । प्रसङ्गेऽस्मिन् साहित्यदर्पणे [२३] प्रतिपादितं यथा-

प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम् ।

प्रसिद्धनायकं गर्भविमर्शाभ्यां विवर्जितम् ।। इत्यादि ।

१३) **शिल्पकम्** - उपरूपकमिदं चतुरङ्कयुक्तं वृत्तिचतुष्टयसहितं श्मशानादिवर्णनायुतं ब्राह्मणनायकं भवति । प्रसङ्गेऽस्मिन् साहित्यदर्पणे [२४] प्रतिपादितं यथा-

चत्वारः शिल्पकेऽङ्काः स्युश्चतस्रो वृत्तयस्तथा ।

अशान्तहास्याश्च रसा नायको ब्राह्मणो मतः ।। इत्यादि ।

१४) **विलासिका-** विलासिका एकाङ्का शृङ्गारबहुला विदूषकविटाभ्यां भूषिता च भवति । अस्मिन् प्रसङ्गे साहित्यदर्पणे [२५] प्रतिपादितं यथा-

शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता ।

विदूषकविटाभ्यां च पीठमर्द्देन भूषिता ।। इत्यादि ।

१५) **दुर्मल्लिका –** दुर्मल्लिका चतुरङ्कयुता कौशिकीभारतीवृत्तियुक्ता अगर्भा न्यूननायक-भूषिता च भवति । प्रसङ्गेऽस्मिन् साहित्यदर्पणे [२६] प्रतिपादितं यथा-

दुर्मल्ली चतुरङ्का स्यात् कौशिकीभारतीयुता ।

अगर्भा नागरनरा न्यूननायकभूषिता ।।इत्यादि।

१६) **प्रकरणी-** यत्र नाटिकैव सार्थवाहादिनायकयुक्ता भवति सा प्रकरणीत्युच्यते । यथोक्तं साहित्यदर्पणे [२७] - प्रकरणिका नाटिकैव प्रकरणी सार्थवाहादिनायका

समानवंशजा नेतर्भवेद्यत्र च नायिका ।।इत्यादि।

१७) **हल्लीशः** - एकाङ्कविशिष्टमुपरूपकं यत्र सप्त अष्टदशसंख्यका वा स्त्रीपात्राणि सन्ति । प्रसङ्गेऽस्मिन् साहित्यदर्पणे [२८] प्रतिपादितं यथा-

हल्लीश एक एवाङ्कः सप्ताष्टौ दश वा स्त्रियः।
वागुदात्तैकपुरुषः कौशिकीवृत्तिरुज्ज्वला।।इत्यादि।

१८) **भाणिका** - भाणिका मुखनिर्वहणान्विता एकाङ्कनिर्मिता कौशिकीभारतीवृत्तियुक्ता च भवति । प्रसङ्गेऽस्मिन् साहित्यदर्पणे [२१] प्रतिपादितं यथा-

भाणिका श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता ।
कौशिकीभारतीवृत्तियुक्तैकाङ्कविनिर्मिता ।।इत्यादि।

एवं प्रकारेणोपरूपकादीनां संक्षेपेण परिचयो दत्तः ।

## सन्दर्भाः


१.- सा. द.-६-३

२.- सा. द.-६/४-६

३.- सा. द.-षष्ठपरिच्छेदस्य प्रारम्भः

४. सा. द.-६/३३६-३३७

५.- सा. द- ६/२१२

६.- सा. द- पृ.-४३४

७.- सा. द- पृ.-४३५

८.- सा. द- पृ.-४३६

९.- सा. द- पृ.-४३६

१०. - सा. द- पृ.-४३८

११.- सा. द- ६-२४५

१२.- सा. द- पृ.-४३९

१३.- सा. द- पृ.-४३८

१४.- सा. द- पृ.-४५१

१५.- सा. द- पृ.-४५१

१६ सा. द- पृ.-४५२

१७.- सा. द- पृ.-४५२

१८ सा. द- पृ.-४५२

१९.- सा. द- पृ.-४५३

२०.- सा. द- पृ.-४५४

२१.- सा. द- पृ.-४५४

२२.- सा. द- पृ.-४५४

२३.- सा. द- पृ.-४५५

२४.- सा. द- पृ.-४५५

२५.- सा. द- पृ.-४५६

२६.- सा. द- पृ.-४५६

२७.- सा. द- पृ.-४५७

२८.- सा. द- पृ.-४५७

२९.- सा. द- पृ.-४५७

**सन्दर्भग्रन्थसूची**

१. साहित्यदर्पणः,मम्मटः ज्ञानमण्डन लिमिटेड, वाराणसी २०१२

२. नाट्यशास्त्रम्, भरतमुनिः, विद्यानिधि प्रकाशन्, दिल्ली १९९९

३. ध्वन्यालोकः आनन्दवर्धनः, चौखम्बा संस्कृतभवनम्, वाराणसी, २००४

४. दशरूपकम् – धनञ्जयः, डॉ रामजी उपाध्यायः, भारतीय विद्यासंस्थानम्, वाराणसी

५. आधुनिकसंस्कृतकाव्यशास्त्रम् – डॉ आनन्दकुमार श्रीवास्तवः,ईष्टर्न बुक् लिकर्स, दिल्ली

६. संस्कृतसाहित्यस्य इतिहासः – प्रो.हरेकृष्णशतपथी, किताबमहल, कटक – १९९८